षत्॥ श्लिष आलिङ्गने॥ श्लेष्टा॥ आलिङ्गने श्लिषः सक्ङोऽपवादः॥ आश्लिक्षत्कन्यां चैत्रः। अनालिङ्गने तु समश्लि

धा०आ०

षञ्जतु का घ्नम्।जिष्विदा गात्रप्रस्रवणे॥स्वेत्ता॥अस्विदत्।क्रुध क्रोधे।क्रोद्धा।अक्रुधत्।क्षुध बुभुक्षायाम्॥क्षोद्धा
।अक्षुधत्॥शुध शौचे।शोद्धा॥अशुधत्॥षिध संराद्धौ।सेद्धा।असिधत्॥रध हिंसायाम्॥रध्यति॥रधिजभोः स्वरेनुम्
रंधा।ररंध॥रधादेर्वेट्॥ररंधिथ॥ररद्ध॥ररंधिव।रेध्व।ररंधिम।रेध्म।लिट्वर्जितेइटिरधेर्नुम्न॥रधिता।रद्धा
॥रधिष्यति।रत्स्यति॥अरधत्।णश अदर्शने।नश्यति॥नशाशनेशात्तुः।नेशीथ।मस्जिनशोर्झलिनुम्।ननंष्ठ।नेशि
व।नेश्व।नेशिम।नेश्म।नशिता।नंष्टा।नशिष्यति।नङ्क्ष्यति।अनशत्।तृप प्रीणने।तृप्यति।ततर्पिथ।ततर्प्थ।तत्र
प्थ।तर्पिता।तर्प्ता।त्रप्ता।तर्पिष्यति॥तर्प्स्यति।त्रप्स्यति।अतृपत्।अतर्पीत्।अतार्प्सीत्।अत्राप्सीत्।दृप हर्षगर्वयोः
॥दृप्यति।अद्राप्सीत्॥अदृपत्॥द्रुह जिघांसायाम्॥दुद्रोहिथ।दुद्रोढ।दुद्रोग्ध॥द्रोहिता॥द्रोढा।द्रोग्धा।द्रोहिष्यति

राम०

ध्रो॥क्ष्यति।अद्रुहत्।मुह वैचित्ये।मुह्यति।मुमोहिथ।मुमोढ।मुमोग्ध।ष्णुह उद्गिरणे।स्नुह्यति।सुष्णोहिथ।सुष्णोढ
।सुष्णोग्ध॥ष्णिह प्रीतौ॥सिष्णेहिथ।सिष्णेढ।सिष्णेग्ध॥शमु उपशमे।शमादीनां दीर्घः।कर्जीरिये।शाम्यति।शशमि

ता॥ अशामत्॥ तमु कांक्षायाम्। ताम्यति। ततामा। तेमतुः। अतमत्। दमु शमनायाम्। दाम्यति। देमतुः॥ अदमत्। श्र-

मु तपसि खेदे च॥ श्राम्यति। शश्राम। शश्रमतुः। अश्रमत्॥ भ्रमु अनवस्थाने॥ भ्राम्यति। भ्रमति। बभ्रमतुः। भ्रेमतुः।

अभ्रमत्। क्षमू सहने॥ क्षाम्यति। चक्षाम। चक्षमिथ॥ चक्षंथ॥ अक्षमत्॥ क्लमु ग्लानौ॥ भ्राशभ्लाशेति वा यः।

क्लाम्यति। ष्ठिवुक्लम्वाचमान्दीर्घोपि। क्लामति। चक्लाम। अक्लमत्। मदी हर्षे॥ माद्यति। ममदिथ। अमदत्। शमाद-

यो ऽष्टौ॥ असु क्षेपणे॥ अस्यति॥ अस्येत्। आस। आसतुः। आसिथ। अस्यतेस्थुक् ङे॥ आस्थत्॥ यसु प्रयत्ने॥ अनु-

पसर्गात्यसः संपूर्वाच्च यो वा॥ यस्यति। यसति। संयस्यति। संयसति। उपसर्गेतु प्रयस्यति। ययास। अत उपधायाः। अ-

यसत्। जसु मोक्षणे॥ जस्यति। जजास। जेसिथ। अजसत्। तसु दसु उपक्षये। तस्यति। तेसिथ। अतसत्। दस्यति। ददा-

स। देसिथ॥ अदसत्॥ वसु स्तंभे॥ वस्यति। ववास। ववसतुः॥ अवसत्। विस प्रेरणे। विस्यति। विवेस। अविसत्। कु-

श संश्लेषणे॥ कुश्यति। चुकोश। कोशिता। अकुशत्। बुस उत्सर्गे॥ बुस्यति। बुबोस। बोसिता। अबुसत्॥ मुस ख-

एऽने॥मुस्यति॥मोसित॥अमुसत्॥मसीसमीपरिणामे॥मस्यति।मेसिथ।अमसत्।सम्पत्ति।सेमिथ।असमत्।
लुठविलोडने।लुठ्यति॥लोठिता॥अलुठत्॥उचसमवाये।उच्यति।उवोच॥ऊचतुः।औचत्॥भ्रशुभ्रंश अधःपत
ने॥भ्रश्यति।बभ्रंशिथ॥अभ्रशत्।भ्रश्यति।बभ्रंश।अभ्रशत्॥वृशवरणे।वृश्यति।ववर्शिथ।अवृशत्॥कृशतनूक
रणे॥कृश्यति॥चकर्शिथ॥अकृशत्॥ञितृषपिपासायाम्॥तृष्यति॥ततर्षिथ॥अतृषत्॥हृषतुष्टौ।हृष्यति
॥जहर्षिथ अहृषत्॥रुषरिष हिंसायाम॥रुष्यति॥रोषिता॥रोष्टा॥अरुषत्॥रिष्यति रेषिता।रेष्टा॥अरिष
त्॥शिष्यति॥शेष्टा अशिषत्।डिपक्षेपे॥[illegible]॥डिप्यति।डिडेप॥अडिपत्।कुपक्रोधे॥कुप्यति॥अकुपत्।
गुपव्याकुलत्वे॥गुप्यति।अगुपत्॥युपरुपलुपविमोहने॥युप्यति।युयोपिथ।अयुपत्।रुप्यति।अरुपत्।लुप्य
ति।अलुपत्।लुभ आकांक्षायाम्॥लुभ्यति।लुलोभ।लोभिता।लोब्धा।अलुभत्॥क्षुभसञ्चलने॥क्षुभ्यति॥चुक्षो
भ।अक्षुभत्।क्लिदू आर्द्रीभावे।क्लिद्यति।चिक्लेद।क्लेत्ता।क्लेदिता॥अक्लिदत्।ञिमिदा स्नेहने।मिदेर्गुणोपे।

मेघति। मिमे मेद। मिघाता। अमि रत। त्रिक्ष्विदा स्नेहनमोचनयोः। स्विद्यति। स्वेदिता।। आस्विहत।। ञिष्विदा च।। स्वि-
द्यति। अस्विदत्। ऋधु वृद्धौ। ऋध्यति।। आनर्ध।। ऋध्यात।। आर्धीत।। गृधु अभिकांक्षायाम्।। गृध्यति। जगर्ध।।
अगृधत्।। इति पुषादयः।। इति पर्म।। षूङ् प्राणीप्रसवे।। सूयते।। सुषुवे।। सुषुविषे। सोता।। सविता।। अस-
विष्ट। असोष्ट। दूङ् परितापे। दूयते। दुदुविद्वे। दुदुविध्वे। अदविष्ट। दीङ् क्षये। दीङो युडचि क्ङिति स्वरस्य। दिदीये। मीनाति
मिनोति दीङां गुणवृद्धिविषये क्वापि घात्वम्।। हासीष्ट दाता। दास्यते। अदास्त।। डीङ् विहायसा गतौ। डीयते। ड-
यिष्यते।। अडयिष्ट।। धीङ् आधारे। धीयते। दिधिढ्वे। दिधिध्वे।। अधेष्ट।। मीङ् प्राणवियोगे।। मीयते।। मेता। रीङ्
स्रवणे।। रीयते। रिरेथे। अरेष्ट।। लीङ् श्लेषणे।। लीयते। लिल्ये। ली लीङोरात्वं वा गुणवृद्धिविषये क्वापि च।। ला-
ता। लेता। अलास्त। अलेष्ट।। व्रीङ् वरणे।। व्रीयते। विव्रिये। व्रेष्यते। अव्रेष्ट।। एते स्वादय ओदितः।। पीङ् पीङ्
पाने।। पीयते।। अपेष्ट।। माङ् माने।। मायते।। ममे।। अमास्त।। अमासाताम्।। ईङ् गतौ।। ईयते।। अयाञ्चक्रे।। प्रीङ्

गतौ॥ प्रीयते। पिप्रिये। अप्रेष्ट। जनी प्रादुर्भावे॥ ज्ञाजनोर्जा चानुर्षे॥ जायते॥ गमांस्वरे॥ जज्ञे॥ जनिता॥ दीपजनति
॥ अजनि॥ अजनिष्ट॥ तूरी गतित्वरणे॥ तूर्यते॥ तुतूरे॥ दीपी दीप्तौ॥ दीप्यते॥ अदीपि॥ अदीपिष्ट॥ पूरी आप्याय
ने। अपूरि। अपूरिष्ट॥ तप ऐश्वर्ये॥ तप्यते। तेपे। तप्ता। अतप्त। वावृतु वर्तने॥ वावृत्यते॥ वावृतञ्चक्रे॥ पद गतौ
। पेदे। पदेरिरण्तनि। अपादि। अपत्साताम्॥ खिद दैन्ये॥ खेत्ता॥ विद सत्तायाम्॥ विद्यते। वित्सीष्ट। वेत्ता॥ अवित्त॥
बुध अवगमने॥ बुध्यते। भुत्सीष्ट। अबोधि। अबुद्ध॥ युध संप्रहारे॥ युध्यते। युयुधे। युत्सीष्ट। अयुद्ध॥ अनुरुध का
मे॥ अनुरुध्यते। अनुरुरुधे। अनुरुत्सीष्ट। अनुरोद्धा॥ अन्वरुद्ध। मन ज्ञाने। मन्यते। मेने। मेनिषे। मन्ता। अमंस्त॥ यु
ज समाधौ॥ युज्यते। योक्ता॥ अयुक्त॥ सृज विसर्गे॥ सृज्यते। रारो भ्रसेट्शाम्॥ स्रष्टा॥ असृष्ट। असृक्षाताम्

। लिश अल्पीभावे॥ लिश्यते। लिक्षीष्ट। लेष्टा। अलिक्षत। अलिक्षाताम्॥ इत्यात॥ मृष तितिक्षायाम्॥ मृष्य
ति। मृष्यते मममर्षे। ममृषे। मर्षिष्यते॥ अमर्षीत्। अमर्षिष्ट। ईशुचिर् क्लेदने। शुच्यते। अशुचत्। अशोचीत्

त ॥ अशोचिष्ट ॥ रंज रागे ॥ अपि रंजेति न लोपः ॥ रज्यते रज्यति ॥ अराङ्क्षीत ॥ अरङ्क्त ॥ शप आक्रोशे ॥ शप्यति

॥ शप्यते ॥ शेपतुः ॥ शेपे ॥ शप्ता ॥ अशाप्सीत ॥ अशप्त ॥ शक मर्षणे ॥ शेकिथ ॥ शशक्थ ॥ पुषादित्वान्ङः ॥ अश

कत् ॥ अशक्त ॥ सेट्कोऽयमित्येके ॥ शकिता ॥ नह बन्धने ॥ नह्यते ॥ नह्यति ॥ नेहिथ ननद्ध नत्सीष्ट ॥ अनात्सीत

अनद्ध ॥ इति दिवादयः ॥ ॥ ॥ अथ स्वादयः ॥ षुञ् अभिषवे ॥ स्वादेर्नुः ॥ कर्त्तरि चतुर्थ ॥ नूपः ॥ नु प्रत्ययस्य

प्रत्ययस्य च गुणो भवति पिति ॥ सुनोति ॥ सुनुते ॥ ओर्वमोर्वा लोपः ॥ सुन्वः ॥ सुनुवः ॥ सुनोतु ॥ ओर्वा हेः ॥ सु

नु ॥ सुनुताम् ॥ सुनवै ॥ असुनोत् ॥ असुनुत ॥ सोषीष्ट ॥ असावीत् ॥ असोष्ट ॥ षिञ् बन्धने ॥ सिनोति ॥ सिनुते ॥ सि

ष्ये ॥ असैषीत् ॥ असेष्ट ॥ शिञ् निशाने ॥ शेता ॥ अशेष्ट ॥ डुमिञ् प्रक्षेपे ॥ मिनोति मीनाति मिनोति दीङां गु

ण वृद्धि विषये क्यपि चात्वम् ॥ ममौ ॥ मिम्यतुः ॥ ममिथ ॥ ममाथ ॥ मिम्ये ॥ अमासीत् ॥ अमास्त ॥ चिञ् चय

ने ॥ चिनोति ॥ चिनोते ॥ सण्लिटोः किर्वा ॥ चिकाय ॥ चिचाय ॥ अचैषीत् ॥ अचेष्ट ॥ स्तृञ् आच्छादने ॥ स्तृणोति ॥ तस्तार

।तस्तरतुः।तस्तर्थ।तस्तरे।स्तर्ष्यीत।अदन्नात्संयोगादेः।सिस्योरिङ्वा ति॥स्तरिषीष्ट॥स्तृषीष्ट।अस्तार्षीत्
।अस्तरिष्ट।अस्तृत॥कृञ् हिंसायाम्।कृणोति।कृणुते।चकर्थ।अकार्षीत्।अकृत।वृञ्।आवरणे।वृञ्जस्य
पइट्।ववरिथ।ववृवे।हो।वृङ्।वृञ्जस्य इन्ता।सिस्योरिङ्वाति॥वरिषीष्ट।वृषीष्ट।अवारीत्।अवारिष्टाम्।अ
वरिष्ट॥अवरीष्ट॥अवृत।धुञ् कम्पने।धुनोति।धुनुते।दुधाव।धोष्यति।अधौषीत्।अधोष्ट॥दीर्घान्तोऽप्य
यम्।धूनोति।ऽअधावीत्।अधौषीत्।अधविष्ट॥अधोष्ट॥रत्नुभयपदस्वक्रिया॥टुदु उपतापे॥दुनोति।दु
दाव॥अदौषीत्॥हि गतौ वृद्धौ च।एवी हिनोते हस्पहोनस्त्वङि।जिघाय।अहैषीत्॥आप्लृ व्याप्तौ॥आप्नो
ति।आप्नुहि।आप।आपतुः।आप्ता॥आपत्॥शक्लृ शक्तौ।शशाक।शेकतुः॥शक्ता।शक्ष्यति।अशकत्।राध

रामः

साध संसिद्धौ॥राध्नोति।राधो हिंसायामेत्वपूर्वलोपो किति लिटि सेटि थलि च।रराध।रेधतुः।रेधिथ॥
अरात्सीत्।प्रागल्भ्यं धृष्टत्वम्।त्रिधृषा प्रागल्भ्ये।धृष्णोति।दधर्ष।अधर्षीत्।दम्भु दम्भे।श्रन्थिग्रन्थिदम्भि

भ्योलिटःकितम्वा॥ दम्भेर्लिङ्येत्वपूर्वलोपो दे भा द्दम्भ्रे भतुः॥ ददम्भतुः॥ देभिथ। ददम्भिथ॥ अदम्भी
त्। अधृष्णद्दो॥ अधोति। आनर्ह॥ आनर्धतुः॥ षिहिंसायाम्॥ सिणोति॥ इतिपम्॥ अशूङ् व्याप्तो सङ्-
घाते च॥ अश्नुते॥ नुगशाम्॥ आनशे॥ असीष्ट। आशिषीष्ट॥ आशिता॥ अष्टा॥ आशिष्ट॥ आष्ट॥ आष्टाते
म्॥ ष्टिघ आस्कन्दने॥ स्तिघ्नुते॥ तिष्टिघे॥ अस्तेघिष्ट॥ इति स्वादयः॥ अथ रुधादयः॥ रुधिर् आवरणे॥ रु-
धादेर्नम्॥ कर्तरि श्नम्॥ रुणद्धि॥ श्नमसोरल्लोपः॥ रुन्धः॥ रुन्धन्ति॥ रुणत्सि॥ रुन्त्से॥ रुन्धाते॥ अरुणत्॥ अरुद्धा
म्॥ अरुणः॥ अरुणत्॥ अरौत्सीत्॥ अरुधत्॥ अरुद्ध॥ भिदिर् विदारणे॥ अभिदत्॥ अभैत्सीत्॥ अभित्त॥ छि
दिर् द्वैधीकरणे॥ अच्छिदत्॥ अच्छैत्सीत्॥ आच्छित्त॥ रिचिर् विरेचने॥ अरिचत्॥ अरैक्षीत्॥ अरिक्त॥ विचिर्
पृथग्भावे॥ अविचत्॥ अवैक्षीत्॥ अविक्त॥ क्षुदिर् सम्प्रेषणे॥ अक्षुदत्॥ अक्षौत्सीत्॥ अक्षुत्त॥ युजिर्
योगे॥ अयुजत्॥ अयौक्षीत्॥ अयुक्त॥ उछृदिर् दीप्तिदेवनयोः॥ छृणत्ति॥ छृन्ते॥ नवृत्तदिति वेट्॥ छर्त्सी

३१

चं० भा०

ष्ट॥ छर्दिषीष्ट॥ अच्छृदत्॥ अच्छर्दीत्॥ अच्छर्दिष्ट॥ उतृदिर् हिंसानादरयोः॥ अतृदत्॥ अतर्दीत्॥ अतर्दिष्ट॥
इत्यमपफद्प्रक्रिया॥ शिष्लृ विशेषणे॥ शिनष्टि॥ शिंष्टः॥ शिंषन्ति॥ शेष्टा॥ शेक्ष्यति॥ अशिषत्॥ पिष्लृ
संचूर्णने॥ पिनष्टि॥ पेक्ष्यति॥ अपिषत्॥ भञ्जो आमर्दने॥ नमः॥ भनक्ति॥ बभञ्जिथ॥ बभङ्क्थ॥ भङ्क्ता॥ अभा
ङ्क्षीत्॥ भुज पालनाभ्यवहारयोः॥ भुनक्ति॥ अभुनक्॥ अभौक्षीत्॥ अभौक्ताम्॥ तृह हिसि हिंसायाम्॥ तृहेम्
मिलते इमाग मः॥ पिति हसे॥ तृणेढि॥ अतृणेट्॥ अतर्हीत्॥ इदितः इति नुम्॥ नमः॥ नम पत्यपात्य रस्य नस्य
लोपः॥ हिनस्ति॥ हिंस्तः॥ हिंसन्ति॥ धि स लोपः॥ हिन्धि॥ अहिनत्॥ अहिनद्॥ अहिनः॥ जिहिंस॥ अहिंसीत्॥ उन्दी
क्लेदने॥ उनत्ति॥ उन्त्तः॥ उन्दन्ति॥ औनत्॥ औन्ताम्॥ औन्दन्॥ औनः॥ औनद्॥ उन्दाञ्चकार॥ औन्दीत्॥ अञ्जू व्यक्तिम्र्लक्षणका

राम०

न्तिगतिषु॥ अनक्ति॥ आनञ्जिथ॥ आनङ्क्थ॥ अञ्जिता॥ अङ्क्ता॥ अञ्जेः सिचि नित्यमिट्॥ आञ्जीत्॥ तञ्चु
संकोचने॥ अतांचीत्॥ अतांक्षीत्॥ ओविजी भयचलनयोः॥ विनक्ति॥ विजेरिड् इति प्रत्ययो ङित्॥ विविजि

से४

थ्य। विजिता। अविजीत्। वृजी वर्जने॥ वृणक्ति। अवर्जीत्। पृची सम्पर्के॥ पृणक्ति। अपर्चीत्॥ इति पम्॥ इन्धी दीप्तौ
॥ इन्द्धे। इन्धीत्। ऐन्द्ध। इंधांचक्रे॥ ऐंधिष्ट। खिद दैन्ये। खिंते। खित्सीष्ट। अखित्त॥ विद विचारणे। वित्सीष्ट अवि
त्त॥ ०॥ इति रुधादयः॥ अथ तनादयः॥ तनु विस्तारे। तनादेरुः। कर्त्तरि चतुर्षु॥ नूपः॥ तनोति॥ तनुतः॥ तन्वन्ति॥
ओर्वमोर्वा लोपः। तनुवः। तन्वः। तनुते॥ तन्वाते। तन्वते॥ तेने॥ अतानीत्। अतनीत्। तनादेस्तन्थ्यासोर्वा लुक्॥ लोप
स्त्वनुदात्ततनाम्॥ अतत। अतनिष्ट॥ अतथाः॥ अतनिष्ठाः॥ षणु दाने॥ सनोति। सनुते। सेनतुः। सेने। जनसन
खनामात्वमिति॥ सायात्। सन्यात्। असात। असनिष्ट। क्षणु क्षिणु हिंसायाम्॥ क्षणोति। अक्षणीत्। अक्षत। अक्ष
ष्ट। अक्षथाः॥ अक्षणिष्ठाः॥ तनादेरुपधाया गुणो वा॥ क्षिणोति। क्षेणोति॥ अक्षेणीत्॥ अक्षित। अक्षेणिष्ट॥ अ
क्षिथाः॥ अक्षेणिष्ठाः॥ ऋणु गतौ॥ ऋणोति। अर्णोति। ऋणुतः। अर्णुतः॥ आनर्ण॥ आनृणे॥ आर्णीत्। आर्त्त।
आर्णिष्ट। आर्थाः। आर्णिष्ठाः॥ तृणु अदने। तृणोति। तर्णोति। अतर्णीत्॥ अतृत। अतर्णिष्ट। अतृथाः। अतर्णिष्ठाः॥ ड

चं०आ०

घृदीप्तौ॥ घृणोति॥ घर्णोति। जघर्ण॥ अघर्णीत्॥ अघृत॥ अघार्षीष्ट॥ अघृथाः॥ अघर्णिष्ठाः॥ डुकृञ् करणे
[illegible] करोति। डित्पडुः॥ कुरुतः॥ कुरु स्तुरोर्न दीर्घः॥ कुर्वन्ति। कृञो नित्यमस्मो रूलोपः॥ कुर्वः॥ कुर्मः
। कृञो पे। कृञ उपस्यपस्य नलोपो पे॥ कुर्यात्। चकर्ष॥ क्रियात्॥ कृषीष्ट॥ अकार्षीत्। अकृत। सम्पर्युपेभ्यः क
रोतेर्भूषणे सुट्॥ संस्करोति॥ अट्द्वित्वव्यवधानेपि सुट्कात्पूर्वः॥ समस्करोत्। सञ्चस्कार॥ ससुटः कृञो लिट इट्
॥ सञ्चस्करिथ॥ सञ्चस्करिव॥ संस्क्रियात्॥ एवं परिस्करुते॥ उपस्कुरुते॥ इत्यात्ये। वनु याचने। वनुते॥ ववने। परस्मै
पदमपमित्येके॥ वनोति। ववान॥ मनु अवबोधने॥ मनु अवबोधने॥ मनुते॥ मेने॥ मनिषीष्ट॥ ०॥ इति तनादयः॥
अथ तुदादयः। तुद व्यथने॥ तुदादेः शः॥ कर्त्तरिच तुर्षु॥ तुदति। तुदते॥ तुत्सीष्ट। अतौत्सीत्॥ अतुत्त। णुद प्रेरणे। नुदति।
नुत्सीष्ट। अनौत्सीत्। अनुत्त। दिश अतिसर्जने॥ दिशति। दिक्षीष्ट। अदिक्षत्। अदिक्षत॥ भ्रस्ज पाके। यहां क्रितिच
॥ भृज्जति। भृज्जते॥ भ्रस्जोरसोरनपिवा। बभर्ज। बभ्रज्ज॥ बभर्जतुः॥ बभ्रज्जतुः॥ बभर्जिथ॥ बभ्रज्जिथ॥ बभर्ष्ठ॥ ब

एम०

मर्ष्व। वमृष्व। ङ्किति संप्रसारणं बाधकम्। मृज्यात्। मृक्षीष्ट। मर्क्षीष्ट। लुङि। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। अमर्ष्ट। स्निपद्वेरणे। सिष्मीष्ट। अक्षैप्सीत्। आसिप्त॥ कृषविलेखने॥ कृक्षीष्ट॥ कृष्ट। कर्ष्टा॥ अक्राक्षीत्॥ अकार्क्षीत्। अकृक्षत्। अकृष्ट। अकृक्षाताम्। अकृक्षत॥ अकृक्षत। अकृक्षाताम्। अकृक्षन्त। मिलसंगमे। मिलति। मिमेल॥ मिमिले। अमेलीत्। अमेलिष्ट॥ मुच्लृमोचने। मुचादेर्नुम्। मुचलुपविदलिशषिचकृतपिशषदामप्राप्त्येम्। मुञ्चति। मुक्षीष्ट। अमुचत्। अमुक्त। लुप्लृछेदने॥ लुम्पति। अलुपत्। अलुप्त॥ विद्लृलाभे। विन्दति॥ अविदत्। अवेदिष्ट॥ अनिडयमित्येके॥ वेत्ता॥ लिपउपदेहे। लिम्पति। लिपिसिचीति। अलिपत्॥ अलिप्त॥ अलिपत। अलिपेताम्॥ षिचक्षरणे॥ सिञ्चति॥ सिषिचे। सिषिचिषे॥ असिचत्॥ असिक्त। असिचत॥ इत्यासे॥ ऋषीगतौ॥ ऋषति॥ आनर्ष॥ ओव्रश्चूछेदने॥ वृश्चति॥ वव्रश्चिथ॥ वव्रष्ठ॥ अव्रश्चीत्। अव्राक्षीत्। अव्राष्टाम्। व्यचव्याजीकरणे। विचति। विव्याच। विविचतुः। विच्यात्। अव्याचीत्। अव्यचीत्। उछिउञ्छे॥ उञ्छति। उञ्छांचकार। औञ्छीत्।

धं०आ०

उस्रा विवासे। उस्राति। उस्राञ्चकार। ओस्रात्। ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु॥ ऋच्छति। आनर्च्छ॥ ऋच्छे
र्लिटि गुणः॥ नुगशाम्। आनर्च्छ॥ आनर्च्छतुः॥ उब्ज आर्जवे। उब्जाञ्चकार। उब्ज आर्जवे। उब्जाञ्चकार। उज्झ
त्यागे॥ उज्झाञ्चकार। लुभ विमोहने॥ लुभति। लोभिता। लोब्धा॥ अलोभीत्॥ तृप तृम्प तृफ तृम्फ तृप्तौ॥ तृपति
अतर्पीत्। तृम्फादीनाम प्रत्यये नुम्। तृम्फति। ततर्फ॥ तुप तुम्प तुफ तुम्फ हिंसायाम्॥ तुपति। अतोपीत्। तुम्पति
॥ अतुम्पीत्। तुफति। तुतोफ। तुम्फति। अतुम्फीत्। दृप दृम्फ उत्क्लेशे॥ दृपति। दृम्फति। गुप गुम्फ उत्क्लेशे। गु
पति। गुम्फति। अगोपीत्॥ अगुम्फीत्॥ उभ उम्भ पूरणे॥ उभति। उवोभ। औभीत्॥ उम्भति। उम्भाञ्चकार। औं
भीत्॥ शुभ शुम्भ शोभार्थे॥ शुभति। अशोभीत्। शुम्भति। अशुंभीत्। दृभी ग्रन्थे॥ दृभति॥ अदर्भीत्। चृती हिंसाग्र
न्थनयोः॥ चृतति॥ न्नृत्तरदृतेति ऋद्वा। चर्तिष्यति॥ चर्त्स्यति॥ अचर्तीत्। विध विधाने। विधति। वेधिता॥ कुट कौ
टिल्ये॥ कुटति। चुकोट। कुटादेर्ङित् गाङ्कुटेः प्रत्ययो ङित्॥ चुकुटिथ। कुटिता॥ अकुटीत्॥ पुट संश्लेषणे॥

राम०

पुटिता॥ अपुटीत्॥ कुच संकोचने॥ कुचति॥ कुचिता॥ अकुचीत्॥ गुज शब्दे॥ गुजति॥ गुजिता॥ अगुजीत्॥ अगु
ड रक्षायाम्॥ गुडति॥ गुडिता॥ अगुडीत्॥ कुर शब्दे॥ कुरति॥ कुरिता॥ अकुरीत्॥ डिप क्षेपे॥ डिपति॥ डिपिता॥ अ
लिपा॥ अक्षरविन्यासे॥ लिषति॥ लिषिता॥ छुर छेदे॥ कुरुछुरोर्नदीर्घः॥ छुर्यात्॥ छुरिता॥ स्फुट विकशने॥
स्फुटति॥ मुट आक्षेपप्रमर्दनयोः॥ मुटति॥ मुमोट॥ मुटिता॥ त्रुट छेदे॥ त्रुटति॥ त्रुट्यति॥ तुत्रोट॥ त्रुटिता॥ तु
ट कलहकर्मणि॥ तुटति॥ तुटिता॥ तुटिष्यति॥ चुट छेदने॥ चुटति॥ चुचोट॥ चुटिता॥ छुट छेदने॥ छुटति॥ छु
टिता॥ जुड बन्धने॥ जुटिता॥ कुड मदे॥ कुडति॥ अकुडीत्॥ लुड श्लेषणे॥ लुडिता॥ क्रुड घनत्वे॥ क्रुडिता॥ कु
ड बाल्ये॥ कुडति॥ पुड उत्सर्गे॥ पुडिता॥ घुट प्रतीघाते॥ घुटिता॥ स्फुर स्फुरणे॥ स्फुरिता॥ स्फुल सञ्चलने
॥ निर्निविभ्यः स्फुरतिस्फुलत्योः सस्य षो वा॥ निःस्फुरति॥ निःष्फुरति॥ निस्फुरति॥ निष्फुरति॥ विस्फुरति॥ वि
ष्फुरति॥ निःस्फुलति॥ निःष्फुलति॥ णू स्तवने॥ अनुवीत्॥ धू विधूनने॥ अधुवीत्॥ गुपुरीषोत्सर्गे॥ जुगविथ॥

जुगुप्य।। घेगस्मात्।। गुता।। ध्रु गतिस्थैर्ययोः।। ध्रुत।। अध्रुषीत्।। इति कुटादयः।। कृती छेदने।। मुचादेर्नुम्।। कृन्ता-
ति।। नृतृदछृदचृतृकृदृभ्योऽसेः सादेरिट्।। कर्त्स्यति।। कर्तिष्यति।। अकर्तीत्।। गृ निगरणे।। गिरतेः स्वरे रस्य
लो वा।। गिरति।। गिलति।। अगारीत्।। अगालीत्।। स्पृश संस्पर्शने।। स्प्रष्टा।। स्पर्ष्टा।। अस्प्राक्षीत्।। अस्पार्क्षी-
त्।। अस्पृक्षत्।। प्रच्छ ज्ञीप्सायाम्।। ग्रहादि किति च।। पृच्छति।। विसर्गउत्पत्तिः।। अप्राक्षीत्।। सृज विसर्गे।।
सृजति।। सृजिदृशोः घ्यपो वेट्।। ससर्जिथ।। सस्रष्ठ।। स्रष्टा।। अस्राक्षीत्।। टुमस्जो शुद्धौ।। मज्जति।। मस्जि-
नशोर्झले नुम्।। मङ्क्ता।। अमाङ्क्षीत्।। विछ गतौ।। आयः।। विच्छायति।। विच्छायांचकार।। विविच्छ।। इषु इच्छा-
याम्।। गमां छः।। इच्छति।। इच्छेत्।। इच्छतु।। ऐच्छत्।। एयेष।। इयेषिथ।। एषिता।। एष्टा।। ऐषीत्।। विश प्रवेशने।।
वेष्टा।। अविक्षत्।। मृश आमर्शने।। अम्राक्षीत्।। अमृक्षत्।। रिपि गतौ।। रिपति।। पिपति।। रेता।। पेता।। क्षिप प्रेरणे
क्षिपति।। क्षि निवासगत्योः।। क्षियति।। षू प्रेरणे।। सुवति।। सविता।। कॄ विक्षेपे।। किरति।। चकार।। चकरतुः।। गॄ पाने।। कि-

रतेः मुइगमः छेदे ऽपै हिंसायामनेषु॥ उपस्किरति। प्रतिस्किरति। रुजो भंगे। अरौ सीत्। अरौक्षाम। भुजो कौटिल्ये॥
॥ भोक्ता॥ अभौक्षीत्॥ छुप स्पर्शने। छोप्ता॥ अछौप्सीत्॥ रुश रिश हिंसायाम्॥ रेष्टा रेष्टारौ। रेष्टारः॥ अरिक्षत्॥ रोष्ट
॥ रोष्टारौ। अरुक्षत्। लिश गतौ॥ लेष्टा॥ अलिक्षत्॥ स्विद परिघाते॥ मुचादे मुम्। स्विंदति। स्वेत्ता॥ अस्वैत्सीत्। पिश
अवयवे। पिंशति॥ पेष्टा॥ इति पम्॥ जुषी प्रीतिसेवनयोः॥ जुषते॥ ओविजी भयचलनयोः॥ विजते॥ विजेः
पर इडादि प्रत्ययो ङित्॥ विजिता॥ ओलजी ओलस्जी व्रीडे॥ लेजे॥ ललज्जे॥ एङ् व्यायामे॥ अपकि॥ ऋतो रिङ्भ
वति अकारे प्रत्यये यकि च॥ नु धातोः॥ म्रियते॥ व्यापरिष्यते। व्याप्टत। व्यापृषाताम्॥ मृङ् प्राणत्यागे। म्रिय
ते। म्रियतेर्लुङ् लिङोश्च तङ् एव वा तः। ममार। ममर्थ॥ मृषीष्ट॥ अमृत॥ दृङ् आदरे। द्रियते॥ दृद्वेद षीष्ट। अदृत॥ धृङ्
अवस्थाने॥ ध्रियते। लोपो ह्रस्वा झसे। अधृत॥ इति तुदादयः॥ डुक्रीञ् द्रव्यविनिमये॥ नाक्र्यादेः॥ कर्तरि श्नु
र्ष॥ क्रीणाति॥ ई हसे॥ ना इत्यस्याकारस्य ई ङिति हसे॥ क्रीणीतः॥ नातः॥ ना इत्यस्याकारस्य लोपो ङिति स्वरे॥

वं०आ०

॥क्रीणाति॥क्रीणीते॥चिक्रयिथ॥चिक्रेथ॥अक्रैषीत्॥अक्रेष्ट॥प्रीञ् तर्पणे कान्तौ च॥पिप्रिये अप्रेष्ट श्रीञ् पा
के॥अश्रैषीत्॥मीञ् हिंसायाम्॥मीनाति॥ममौ॥मिम्यतुः॥ममिथ॥ममाथ॥मासीष्ट॥माता॥अमासीत्॥अमा
स्त॥स्कुञ् आप्लवने॥स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यो नुश्नौ च॥स्कुनोति॥स्कुन्वन्ति॥स्कुनुते॥स्कुनाति
॥स्कुनीते॥अस्कुनीत॥चुस्कुविषे॥अस्कौषीत्॥अस्कोष्ट॥स्तम्भुः स्तुम्भु स्कम्भु स्कुम्भु रोधने॥एतेपवन्तः
वेः स्तम्भादीनां सस्म्भ्यः॥विष्टभ्नोति॥विष्टभ्नाति॥स्तुभ्नोति॥स्तुभ्नाति॥स्कभ्नोति॥स्कभ्नाति॥स्कुभ्नोति॥स्कुभ्ना
ति॥हसादानहौ॥हसान्ताद्धातोर्नाप्यस्य आनः स्याद्धौ परे॥स्तभान॥स्तुभान॥स्कभान॥स्कुभान॥अस्तभत्
॥अस्तम्भीत्॥पुञ् पवने॥पुनाति॥[illegible] स्कभान॥स्कुभान॥[illegible]
पोता॥कॄञ् शब्दे॥कॄनाति॥अक्रावीत्॥अक्राविष्ट॥दॄञ् हिंसायाम्॥दॄणाति॥दविता॥अदावीत्॥पूञ् पवने॥
घादेर्ह्रस्वःकर्त्तरिचतुर्षौ॥पुनाति॥अपावीत्॥लूञ् छेदने॥लुनाति॥विष्ट॥स्तॄञ् आच्छादने॥स्तृणाति॥तस्तार॥त

राम०

स्तरतुः॥ स्तीर्यात्॥ स्तरिषीष्ट॥ स्तीर्षीष्ट॥ अस्तारीत्॥ अस्तीष्ट॥ अस्तरिष्ट॥ अस्तीर्ष्ट॥ कॄञ् हिंसायाम्॥ कृणा
ति॥ चकार॥ चकरे॥ वृञ् वरणे॥ वृणाति॥ वूर्य्यात्॥ वरिषीष्ट वूर्षीष्ट॥ अवरिष्ट॥ अवरीष्ट॥ अवूर्ष्ट॥ धूञ् कम्प
ने॥ धुनाति॥ ड धविष्य॥ ड धोष्य॥ धोता॥ धविता॥ अधावीत्॥ अधविष्ट॥ अधोष्ट॥ ग्रह उपादाने॥ गृह्णाति॥ गृह्
णा॥ ग्रहीषीष्ट॥ ग्रहीता॥ ग्रहीष्यति॥ अ[illegible]॥ ग्रहीत्॥ अग्रहीष्टाम्॥ अग्रहीषुः॥ अग्रहीः॥ अग्रहीष्म॥ अग्रही
ष्ट॥ अग्रहीषाताम्॥ अग्रहीषत॥ अग्रहीष्ठाः॥ ऋ पालने॥ शॄ हिंसायाम्॥ शृणाति॥ शॄ होर्ह्रस्वो वा लिटि॥ शश
रतुः॥ शश्रतुः॥ शीर्यात्॥ शरिता शरीता॥ पॄ पालनपूरणयोः॥ पृणाति॥ पपरतुः॥ पूर्यात्॥ वॄ वरणे॥ वृणाति॥
ववरतुः॥ वूर्यात्॥ भॄ भर्त्सने भरणयोः॥ भृणाति॥ मॄ हिंसायाम्॥ मृणाति॥ दॄ विदारणे॥ दृणाति॥ ददरतुः॥ दद्रतुः॥
जॄ वयोहानौ॥ जृणाति॥ नॄ नये॥ नृणाति॥ ऋ गतौ॥ ऋणाति॥ अराञ्चकार॥ ईर्यात्॥ अरिता॥ अरीता॥ आरी
त्॥ गॄ शब्दे॥ गृणाति॥ अगारीत्॥ ज्या वयोहानौ॥ ग्रहा ङ्किःति च॥ जिनाति॥ जिज्यौ॥ जिज्यतुः॥ जीयात्॥ अ

ज्यासीत्॥ री गतिरेषणयोः॥ रिणाति रिर्य्यतुः॥ ली श्लेषणे॥ लिनाति॥ लीली ङो रात्वम्वागुणवृद्धिविषयेक्वापि
च॥ ललौ॥ लिलाय॥ लिल्यतुः॥ लाता॥ लेता॥ अलैषीत्॥ अलासीत्॥ व्ली वरणे॥ व्लिनाति॥ व्ली गतौ॥ व्लिना
ति॥ इति पाठ्यः व्ली वरणे॥ भ्री भयचलनयोः॥ क्षी हिंसायाम्॥ एषां त्रयाणां वा ह्रस्वः॥ क्षीनति॥ क्षिनति॥ ज्ञा
अवबोधने॥ ज्ञा जनोर्जा चतुर्षु॥ जानाति॥ वन्ध वन्धने॥ वध्नाति॥ ववन्धिथ॥ ववंद्ध॥ भन्त्स्यति॥ अभांत्सी
त्॥ मन्थ विलोडने॥ मथ्नाति॥ श्रन्थ ग्रन्थ सन्दर्भे॥ श्रन्थि ग्रन्थि दम्भि स्वञ्जोलिटः कित्त्वम्वा॥ श्रेथतुः॥ शश्राथ
॥ जग्रन्थ॥ जग्राथ॥ कुन्थ॥ कुन्थ संश्लेषणे संक्लेशनयोः॥ चुकुन्थ॥ चकोथ॥ मृद मृड क्षोदे॥ मृद्नाति॥ मृ
॥ मृडान॥ मृडान॥ गुध रोषे॥ गुध्नाति॥ कुष निष्कर्षे॥ अन्तर्गतस्य निःसारणं निष्कर्षम्॥ कुष्णाति कुषाण

॥ निरः कुषो वा इट्॥ नि कुष्णीयन्ती॥ निष्कोषिता॥ निष्कोष्टा॥ निरकोषीत्॥ निरकुक्षत्॥ क्षुभ सञ्चलने॥ क्षुभ्नाति॥ क्षु
भ्नादिषु न णत्वम्॥ क्षुभान॥ नभ तुभ हिंसायाम्॥ नभ्नाति॥ तुभ्नाति॥ क्लिशू विबाधने॥ क्लिश्नाति॥ अक्ले

शीत्।अल्किसत्।अश्न भोजने॥अश्नाति॥आशाउथ्रसुउञ्छे॥थ्रस्नाति॥ऊकारोधात्ववयवइत्येके॥उथ्रसा
ञ्चकार।विषविप्रयोगे।विषाण॥वेष्टा।अविष्टत्॥पुषपुष्टौ॥पोषिता॥मुषस्तेये।मोषिता।खवखवहिंडभूत।
प्रादुर्भावे।खवञ्चाति॥वस्मोने।खेवोनाति॥हिंठ्नाति॥इतिपम्॥वड्संपन्न्कौ॥हरीणीते।वहषे॥वरिषीष्ट।हृषी
ष्ट॥अवरिष्ट।अवरीष्ट॥अहंत।इतिक्र्यादयः॥अथचुरादयः॥चुरस्तेये॥चुरादे:स्वार्थेणिच्॥सधातुः।चोरयति।चो
रयाञ्चकार।चोर्य्यात्॥णेरङ्डिस्व॥णेः॥अडि॰ लघोर्हृस्वउपधायाः।लघोर्दीर्घः॥अचूचुरत्।चुरादेर्णिज्वैति
केचित्॥चोरति॥चितिस्मृत्याम्॥चिन्तयति॥अचिचिन्तत्॥ओलडि॥ओलडति।ओकारइदित्येके॥लडयति।अल
लडत्।लडति॥पीडअवगाहे॥पीडयति॥भ्राजभासभाषदीपजीवमीलपीडाम्वोपधायाहृस्वो:ङ्परेणौ
अपीपिडत्।अपिपीडत्॥प्रथप्रख्याने॥प्राथयति॥स्मृदृत्वरप्रथम्रदस्तृस्पशामत्वस्य अत्ङ्परेणौइत्वा
पवादः॥अपप्रथत्॥ष्णप्रक्षेपे॥पर्थयति।उपधायाअवर्णस्यचङ्परेणौइत्त्वमपवादः॥अपीपष्य

चं०आ०

त॥अपपर्यत्॥भस्म अदने॥भस्मयति।आबभस्मत्॥ श्रण दाने।विश्राणयति॥ अशिश्रणत्॥ अशश्राणत्॥त
ड आघाते॥ताडयति॥अतीतडत्॥ज्ञप ज्ञानज्ञापनयोर्मित्॥मितां ह्रस्वः॥मितांम्वात्‌नामुपधाया ह्रस्वो भो॥ज्ञ
पयति॥अजिज्ञपत्।यम वेष्टने मित्॥यमयति॥अयियमत्॥चह चय परिकल्कने मित्॥चहयति अचीचहत्॥
चपयति।अचीचपत्॥रह त्यागे॥रहयति॥अरीरहत्॥वल प्राणने॥वलयति।अवीवलत्।चिञ् चयने मित्।वि
स्फुरोर्णौ वात्वं वा।रातेः ओपुक्॥अधातो रादन्तस्य च औपुक्।चपयति।चययति।अचीचयत्।अचीचपत्।स्वार्थे
णिज्‌पाठिभ्योऽन्येमितो न।कृत संशब्दने।धातोरुपधा।पा ऋत इत्।कीर्त्तयति।अचीकृतत्।अचिकीर्त्तत्।आकुस्मा
दात्मनेपदिनः॥चित संवेतने।चेतयते।अचीचितत्।दशि दंशने।दंशयते।अददंशत्।आकुस्मीयमात्मनेपदं णिसं
नियोगेनैव॥दंशतिः।नलोपो न स्यज्जिनासा हवर्याभ्या द्देवतन्त्र्यग्रहणात्।तंत्रि कुटुम्बधारणे॥तंत्रयते।कुटुम्ब
यते।अततन्त्रत्।अचुकुटुम्बत।मन्त्रि गुप्तभाषणे।मंत्रयते।अममन्त्रत।शामल स्म आलोचने।शामयते।अशीशमत

राम०

ल्हसपते। अललसत हिक्कुपरिकूजने। रेचयपते। मर विज्ञाने। मारयते। अजीमरत्। विद चेतनाख्यान निवासेषु। वेदयते॥

कुस्मनाम्नो वा। कुस्मेति धातुः कुत्सितस्मयने। कुस्मयते। अचुकुस्मत॥ अथ वा कुस्मेति नामततो णिः॥ कण नि

मीलने। काणयति॥ अचीकणत्॥ अचकाणत्। नवगणपाठमुक्तेभ्यो हिंसार्थेभ्यस्स्वार्थे णिः॥ हिंसयति। हिसि हिंसा

याम्। ज्ञा नियोगे। आज्ञापयति। आजिज्ञपत्। भूमिश्रीकरण चिन्तनयोः॥ भावयति। णिनिमित्तः स्वरादेशो द्विर्वचनेक

र्तव्ये स्थानिवत्। अवीभवत्। लोकृ लोचृ परिभाषणे। लोकयति। नग्लिनः॥ न्क्लदितः शासस्वाद्युपधाया ह्रस्वो न॥

अलुलोचत्। धूञ् कम्पने। धूञ् प्रीञोर्नुक् वाच्यो॥ धूनयति। धावयति। अदूधुनत्॥ अदूधवत्॥ प्रीञ् तर्पणे॥

प्रीणयति प्राययति। अपिप्रिणत्। अपिप्रयत्। अथादन्ताः॥ कथ वाक्यप्रबन्धे। पतः। अल्लोपः स्थानिवत्॥ ते

न न वृद्धिः॥ कथयति। अल्लोपि सिनो नाङ् काप्यनि। अचकथत्। वर ईप्सायाम्। वरयति। अववरत्। गण संख्याने।

गणयति। गणेः पूर्वस्य ई द्वाङ्परेभ्यो। अजीगणत्। अजगणत्। स्तन गद देवशब्दे। स्तनयति। गदयति। अतस्तनत्

धं॰ आ॰

अजगदन्त्॥ पत गतौ वा॥ वा त्वन्त इत्यर्थः॥ पतयति। पतति। पतयाञ्चकार। पताञ्चकार। अपपतत्। अपतीत्। वा
दन्त इत्येके। अपातयति। अपीपतत्॥ रच प्रयत्ने। रचयति। अररचत्। सूत्र वेष्टने॥ सूत्रयति। असुसूत्रत्। उत्सर्गस्त्यागः
मूत्र उत्सर्गे। मूत्रयति। कल गतौ संख्याने च। कलयति। स्पृह ईप्सायाम्। स्पृहयति। अपस्पृहत्। भाम क्रोधे।
भामयति। अबभामत्। सूच पैशुन्ये। सूचयति। ऊनय परिहाणे। ऊनयति। णिनिमित्तः स्वरादेशो द्वित्वकर्तव्ये स्था
निवत्। स्वरादेः परः॥ स्वरादेर्द्वितीयोऽवयवो द्विरुक्तः सस्वरो द्विर्भवति। औननत्॥ अर्थ इङ् याचने।
अर्थयते। आर्तिथत॥ संग्राम इङ् युद्धे। अससंग्रामत। अम्ब द्रव्य उपघाते। अम्बयति। आम्बत। अङ्कु अङ्क पदे ल
क्षणे च। आञ्चकत। आज्जगत॥ इति चुरादयः॥ धातोः स्वेरणो। धातोः प्रयोजकव्यापारे णिजः प्रत्ययः॥ भ
वन्तं प्रेरयति भावयति। भावयते। भावयाञ्चकार। अङ्-समोः पूर्वस्याकारस्येत्वं पवर्गयल जकारे षवर्णे
परेषु परतः॥ अबीभवत्। मूङ् बन्धने। मावयति। अमीमवत्। युमि प्रुसे अमिप्रुसे च। पावयति। अपीपवत्।

राम॰

अरीरवत्। अलीलवत्॥ अजीजवत्॥ स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनामङ्सयोः पूर्वस्येत्वंवा
अवर्णपरयान्तस्थेपरे। असिस्रवत्। असुस्रवत्। अशिश्रवत्। अशुश्रवत्। अदिद्रवत्। अदुद्रवत्। अपिप्र-
वत्। अपुप्रवत्। अपिप्लवत्। अपुप्लवत्। अशशासत्। अदुढौकत्। अत्रातत्रिः। चोरयति। अचूचुरत्। हनो
घत्। हन्तेर्घहादेशइणावर्जितेञ्णिति। घातयति। अजीघतत्। शादेरगतौतोशातयति॥ अशीशतत्। गतौ
तु। शादयति। अशीशदत्। रीतोजोपुक्। पुकिगुणः अर्पयति। आर्पिपत्। दापयति। अदीदपत्। धापयति
अदीधपत्। स्थापयति। तिष्ठतेरुपधायाइत्। अतिष्ठिपत्। पातेर्लुक्। पाशाच्छासोह्वेव्येवेञांपुक्
ञौ॥ पाययति। पिबतेरङिपूर्वस्येकारउपधायालोपश्च। अपीप्यत्। पाययति। अशीशयत्। छाययति।
अचिच्छयत्। साययति। असीषयत्। ह्वाययति। ह्वयतेर्ण्यन्तस्य। ङसपोः संप्रसारणंयुगभावश्च। अजू-
हवत्। अजुहावत्। व्याययति। अविव्ययत्। वाययति। अवीवयत्। पातेर्णौलुक्। पालयति। अपीपलत्। प

धं०आं०

योजकात्तु स्मयतेर्णौ स्मयते रात्त्वम्। भीस्मिभ्यां स्मनात्। स्मापयते। योजकाद्धेतुभये स्मापयते।। जटिलो विस्मापयते। व्यसि
स्मपत। भियः स्वरस्यात्त्वमातः भावेषु कर्मो हेतौ खेदे यम्। पुगागमे भापयते। भीषयते। अबीभपत। अबीभिषत। रु
हेर्णौ पो वा। रोहयति। रोपयति। अरूरुहत्। अरूरुपत। कल्पयति। अचीक्लृपत। अचकल्पत। वर्त्तयति। अवीवृतत। अ
ववर्त्तत। मार्जयति। अमीमृजत। अममार्जत। इङ्-क्रीजीनामात्वं णौ। अध्यापयति। अध्यापिपत। अङ्-सपरे णौ इ
ङो गा वा। अध्यजीगपत। क्रापयति। अचिक्रपत। जापयति। अजीजपत। ह्रीव्लीरीक्नूयीक्ष्माय्यातां पुकि। ह्रेपय
ति। हिह्रिपत। व्लेपयति। अविव्लिपत। रेपयति। अरीरिपत। पव पोर्वसेहकारे चलोपः।। क्नोपयति। अचुक्नुपत। क्ष्मा
पयति। अचिक्ष्मपत।। दुषेर्णौ दीर्घः।। दूषयति। अदूदुषत। स्फायो वः।। स्फावयति। अपिस्फवत। अदुदुषमे। अ
डुपति। आडिड[illegible]त। आर्चिचत। ऊनयति। औनिनत। उब्ज आर्जवे। उब्जयति। औब्जिजत। ड्रापयति। अदिड्रपत। र
भिलभोः स्वरे नुम् अत्व इलि [illegible]टो।। रंभयति। अररंभत। डुलभष प्राप्तौ। लंभयति। अललंभत। हापयति। अजीहप

स्मा०

त्सारस्मारयति। असस्मरत्। दारयति। अददरत्। वेष्टिचेष्ट्योः पूर्वस्यात्वं वा ङि। अविवेष्टत्। अववेष्टत्। अचिचेष्टत्। अ
चचेष्टत्। भ्राजदीप्तौ। अविभ्रजत्। अबभ्राजत्। कणरणलोटि श्रणभणलुपहेठिकूजवाणिलोटिलोपीनां वा
ह्रस्वो ङि। अशिश्रणत्। अशश्राणत्॥ अलूलुपत्। अलुलोपत्। अजीहिठत्॥ अजिहेठत्। अजूहुवत्। अजु
हावत्। अवीवणत्। अववाणत्। अलूलुठत्। अलुलोठत्। स्वापेः संप्रसारणमङि॥ असूषुपत्। स्वपतेर्ण्य
न्तस्य संप्रसारणं वा ङः स्यो॥ आशिश्वयत्। अशूशवत्॥ जिघ्रतेरुपधाया इद्वा ङि। अजिघ्रिपत्। अजिघ्रपत्
॥ सिध्यतेरैहलौकिके ऽर्थे सस्मात्वं णौ। अन्नं साधयति। असीषधत्। अन्यत्र सेधयति। असीषिधत्। प्रजननेवी
पतेरात्वम्वा णौ॥ वापयति। वाययति वा गाः पुरोवातः। गर्भं ग्राहयतीत्यर्थः। चित्तविरागे दुषेर्दीर्घो वा णौ॥ दूषय
ति। दोषयति वा चित्तं कामः। विरागमुत्पादयतीत्यर्थः। इणो जो वा गमिः। गमयति। अजीगमत्। आययति। आ
यियत्। मितां ह्रस्वः। घटादयो मितः। घटयति। व्यथयति। प्रथयति। अपप्रथत्। प्रस विस्तारे। प्रसयति। प्र

धं०आ०

दमर्दने। म्रदयति। अमम्रदत्। स्खद विद्रावणे। स्खदयति। त्वरयति। अतत्वरत्। ज्वररोगे। ज्वरयति। नटनृत्ते। नटय
ति। चकतृप्तौ। चकयति। लगे संगे। लगयति। ज्वलदीप्तौ। प्रज्वलयति। स्मृङ् आध्याने। स्मरयति। असस्मरत्। दृभ
ये। दरयति। अदद्दरत्। नृनये। नरयति। श्रापाके। श्रपयति। मारणतोषणनिशामनेषु ज्ञा। ज्ञपयति। कम्पनेच
लिः। चलयति। शाखाम्। अन्यत्र शीलं चालयति। अन्यथा करोति॥ मदी हर्षदैन्ययोः। मदयति। हर्षदैन्ययोः कि
म्॥ मादयति। ध्वनशब्दे। ध्वनयति। अदिध्वनत्। जनीजृष्क्नसुरंजोऽमन्ताश्च। जनयति। जरयति। क्नसुह्वौटि
ल्यदीप्त्योः। क्नसयति। रञ्जेर्णौ मृगरमणे नलोपः। रजयति मृगान्। अन्यत्र रंजयति वस्त्रम्। अरीरजत्। अररञ्ज
त्। शमयति। शमुपसमे। शाम्यन्तं प्रेरयति। ज्वलह्वलह्मलनमामनुपसर्गाद्वा। ज्व[illegible]लयति। ज्वालयति। ह्व
लयति। ह्वालयति। ह्मलयति। ह्मालयति। उपसर्गेतु प्रज्व[illegible]लयति। प्रह्मलयति। ग्लास्नावनुवमांच्च। ग्लय
यति। ग्लापयति। स्नपयति। स्नापयति। वनयति। वानयति। वमयति। वामयति॥ नकम्पामिचमाम्। कामयति।

आमयति। आमिमत्। चामयति। शाम्यति। ईर्शने मिन्न। निशामयति। रूपम्। पवृत्तिर्भोजनतोऽन्यत्रामिन्न।
आपामयति। भोजने तु पमयति विषम। स्ववदिस्वपरिभ्यां मिन्न। अवस्वादयति। परिस्वादयति। ईर्ष्य अस्या
नो। ईर्ष्यतेस्तृतीयो द्विः। तृतीयो हसएकस्वरो वा। ईर्ष्यियत। स्वरादेः परः। ईर्ष्यिषत्। द्वितीयपक्षे सान्ते। ईर्ष्यि
षिषति। ईर्ष्यिपिषति। इति सन्नन्त प्रक्रिया॥ ॥६॥ इच्छायामात्मनः सः। धातोरात्मन इच्छायामर्थे सप्रत्ययः। द्वि
त्वं। भवितुमिच्छति बुभूषति। बुभूषांचकार। अबुभूषीत्। [illegible]वुसे। उवर्णा[illegible]न्ताद्दवर्णान्तात्प्यहिगृहिभ्यां
च परस्य सस्य नेट्। नानिटि से। इङ्गूर्जिते सप्रत्यये गुणो न। तितीर्षति। चिनोतेः सगादौ किर्वा। चिकीषति। चिचीष।
ति। सेदीर्घः। जिगीषति। सपरोसपोर्जेर्गिः। युयूषति। पस्से। पिपसति। पिपासति। मुमूर्षति। पुपूर्षति। रुद विद मुष
ग्रहि स्वपि प्रच्छिभ्यः सः किन्। रुरुदिषति। विविदिषति। मुमुषिषति। होढः। षढोः कः से। आदिजवानाम्। जि
घृक्षति। सुषुप्सति। कृमृदृप्रच्छिभ्यः सस्येट्। चिकरिषति। जगरिषति। पिपृच्छिषति। अत्तुमिच्छति जिघत्स

ति। हनिङोस्सेदीर्घः। जिघांसति। इङः सेगम्। सान्नात्पूर्वबदात्। अधिजिगंसते। गमेः सस्पेटा। नाति। जिगमिषति। इ
स्से। आपि ह्या थारभलभ शकपङ्पत्। मिमीमामाङ्मेङां स्वरस्येसः निटिसे यो पूर्वस्य चलोपः। दित्सति। धित्सति
। रभरामस्ये। डुमिञ प्रक्षेपणे। नीञ्हिंसायाम्। स्फोरा घोञ्। रवसेचपाभ्। सानाम्। रि[illegible]प्सते। लिप्सते। शीप्स
ति। पित्सते। पत नन्दरिङाभ्यः सस्पेङ्। पित्सति। पिपतिषति। भित्सति। भित्सते। मा माने। मित्सति। मेङ्प्रणी
दाने। माङ्मे ङोर्मित्सते। आप्नोतेरीः। आप्नोते[illegible]राईः सेपूर्वलोपश्च। ईप्सति। अशो नाप्योवा। अशो ईच्छुआपांवा। नाप
श्चत्य पः। अशनापति। आशिशिषति। तितनिषति। तनेरनिटि सेवादीर्घः। तितांसति। तितंसति। दिद्रिद्विषति।
दिद्रिद्रासति। दंभि ज्ञपिभ्यां सस्यवेट्। दंभुदंभे। दिदंभिषति। जिज्ञपयिषति। ज्ञपेः स्वरस्या निटि सेई न पूर्वलो
पश्च। ज्ञीप्सति। रभ्येरिच्चा धिप्सति। धीप्सति। इवन्त क्रम ध्र भ्रस्ज श्रिस्वयूर्णु भ्रसनिभ्यः सस्पेङ्। दिदेविषति। वस्या
निटि सेऊः। दुद्यूषति। अर्दिधिषति। क्रम ध्रेरनि टिसे स्वरस्य ई भवति द्वित्वलोपश्च। ईर्त्सति। विभर्जिषति। विभ्रज्जिषति।

एम० १

विम्रक्षति। विमर्क्षति। शिश्रापयिषति। शिश्रीषति। स्वृ शब्दोपतापयोः॥ सिस्वरिषति। सुस्वूर्षति। पवितुमिच्छति
पिपविषति। पुपूषति। ऊर्णुनुविषति। ऊर्णुनविषति। ऊर्णुनूषति। विभरिषति। बुभूर्षति। स्तौतिण्यन्तयोरेव षे पू
र्वास्सस्य षः॥ स्तोतुमिच्छति तुष्टूषति। साधयितुमिच्छति। सिषाधयिषति। सुषापयिषति। स्तौतिण्यन्तयोरि
ति किम्। सिसानिषति। षे किम्। तिष्ठासति। [illegible] सिषासति। अनिटि से उपधायानस्य लोपः। तं हू हिंसार्थम्। तं हितुमि
च्छति तितंसति। तितंहिषति। उषाः सेगमनबोधने। एतुमिच्छति जिगमिषति। बोधने तु। प्रतीषिषति। इण्वदिकः
। अधिजिगामिषति। बोधने तु। अधीषिषति। स्वरर्णोवर्णाद्यो हसादेरसान्तात्हान्ताच्च क्त्वा सौ सेटौ वा किंतौ। द्यो
तितुमिच्छति दि[illegible] द्युतिषते। दिद्योतिषते। रुरुचिषते। रुरोचिषते। लिलिखिषति। लिलेखिषति। सिस्नेहिषति। सि
स्निहिषति। सिस्निक्षति॥ आ धो हिंसायामिस्सो द्वित्वलोपश्च। आदुमिच्छति ईत्सति। अन्यच्च आरिरात्सति गुरुम्। मु
चोः कर्मकस्य गुणो वा से द्वित्वलोपश्च। मोक्तुमिच्छति मोक्षते। मुमुक्षते वा वत्सः स्वयमेव। अकर्मके ति किम्।

मुमुक्षति वत्सं कृष्णः। वर्तितुमिच्छति विवृत्सति। विवर्तिषते। नर्तितुमिच्छति निनर्तिषति। निनृत्सति। हृञ् हृञ्
ञ्ज दन्तात्सस्पेद्धा। तरीतुमिच्छति तितरिषति। तितरीषति। तितीर्षति। वरितुमिच्छति विवरिषते। विवरीषते। वु
वूर्षते। विवरिषति। विवरीषति। वुवूर्षति। विवरिषते। विवरीषते। वुवूर्षते। ध्वृ कौटिल्ये। दुध्वूर्षति। दिध्वरिषति॥
स्मिङ् पूङ् रञ्ज्वशूभ्यः सस्पेट। स्मिङ् ईषद्धसने। पूङ् गतौ। ऋ गतौ। सिस्मयिषते। पिपविषते। अरिरिषति। आ
जिजिषते। आशिशिषते। डचिचिषति। अधिजिगापयिषति। अध्यापिपयिषति। श्वापयितुमिच्छति शिश्वाप
यिषति। शुशावयिषति। जुहावयिषति। पुस्फारयिषति। चुक्षावयिषति॥ पिप्यावयिषति। बिभावयिषति। पि
प्यावयिषति। रिरावयिषति। लिलावयिषति। युस्नावयिषति। सिस्नावयिषति। स्तन्नाम्सोन। स्वार्पसा। ज्ञोत्स्या
देव। जुगुप्सिषते। ०। इति सन्प्रक्रिया॥ ॥ अतिशायेह सादेर्यङ्। हृस्व। हसादेरेकस्वराद्धातो रतिशाये यङ् पौनःपु
न्ये च पङ् धातोर्द्विर्वचनम्। पङि। पङि पङ्क्षु किच पूर्वस्य नामिनो गुणः। सधातुः। ङित्वादात्म। अतिशायेन पुनः पुनर्वा भ

एम॰

वतिवोभूयते।वोभूयाञ्चक्रे।वोभूयिषीष्ट।अवोभूयिष्ट।वोभुज्यते।अनपिचहसात्।हसाद्युत्तरस्यपस्यलोपोभ
वत्यनपिविषये।वोभुज्ञाञ्चके।मोमुत्स्यते।लेलिह्यते।जोहूयते।वियते।आतः।पडि·पङ्ग्·किंचपूर्वस्यात।आका
रः।पापच्यते।पापठ्यते।सिवोयडि·नषः।सेसीव्यते।स्वविस्त्रविमूत्र्यघत्त्पेिशूर्णोतिभ्योपङ्।सोसूच्यते।मोमूत्र्य
ते।सोसूच्यते।पकारपरेरेफस्यनद्वित्वनिषेधः।अरार्प्यते।अनपिचहसात्।।पत।।अरारान्चक्रे।अशाश्यते।ऊ
र्णोनूयते।।गत्यर्थात्कौटिल्ये।एवयङ·।कुटिलमटति।अटाट्यते।वाव्रज्यते।लुपसदचरजपजभदहदंशगृभ्योधा
त्वर्थगर्हायामेवयङ।गर्हितंलुम्पति।लोलुप्यते।सासद्यते।अमज्जपानुकः।जमानुस्वजपजभदहदंशभञ्जपसचर
फलांचपूर्वस्यनुकपेङ्ग्·को।।चरफलोरूर्वात्यस्यात्।अत्यङ्ग्·कोः।चञ्चूर्य्यते।चञ्चुराञ्चक्रे।पम्फुल्यते।नुगितय
नेनानुस्वारोलक्ष्यतेसचयदृानवत्।जंजप्यते।गिरतेरेफस्यलत्वंयङि·।जेगिल्यते।पंपच्यते।दीङ्·क्षये।देदीय
ते।ओप्यायीवृद्धौ।लिटयङोःप्यायःपी।पेपीयते।वंभ्रम्यते।वावायते।चंखन्यते।चेकरायते।तंतन्यते।जंज

भ्यते। दंदह्यते। दंदश्यते। बंभज्यते। पसवाधनयन्थनपोः। पंपस्यते। रीगृदुपधस्य। ऋत्वतो धातोर्यङि। परेरूर्वस्य
रीक्। नरीनृत्यते। वरीवृत्यते। जरीगृध्यते। वरीवृश्च्यते। परीपृच्छ्यते। चलीक्लृप्यते। वशेर्यङि। नसंप्रसारणम्। वा
वश्यते। श्वयतेर्वा। शोशूयते। शेश्वीयते। सास्मर्यते। कवतेः पूर्वस्य न चुत्वं यङि। कोकूयते। कोकूयते। वंचुस्रंसु
ध्वंसुभ्रंसुकसपतपदस्कंदां यङि पूर्वस्य नीक्। वनीवच्यते। सनीस्रस्यते। दनीध्वस्यते। बनीभ्रस्यते। च
नीकस्यते। पनीपत्यते। पनीपद्यते। चनीस्कद्यते। ऋतो रिः यङि। चेक्रीयते। जेह्रीयते। वेव्रीयते। दादेरिः। अपि
दृशाम्। भगाहाक्रापि वतिसोस्थामिकारः। ङ्किं निहसे। देदीयते। देधीयते। मेमीयते। जेगीयते। जेहीयते। पेपी
यते। सेषीयते। तेष्ठीयते। घ्रा घ्रोरीयङि। जेघ्रीयते। देध्मीयते। हन्तेर्हिंसायां घ्नीभावः। जेघ्नीयते। जंहन्यते। स्वपि
स्यमिव्येञां यङि संप्रसारणम्। सोषुप्यते। सेसिम्यते। वेवीयते। चायः कीयङि। वा एषूज्ञानिशामनयोः। चे
कीयते। जाज्ञायते। जंजन्यते। शीङो ऽयङ् यङि। ति। शाशय्यते। डोढौकते। तोत्रौक्यते। इति यङन्तप्रक्रिया॥ वा ऽन्य

वत्र।ऊकप्रत्ययसंयोगं विनायङोलुग्वा।यङु·गन्तात्यम्। अदादौवोध्यम्। अदादित्वाद्योलुक्।यङु·किस्तनिपित्स्मो
वेट्।वोभवीति।वोभोत्ति।वोभूतः।वोभुवति।वोभूयात्।वोभवीतु।वोभोतु।वोभूहि।अवोभवीत्।अवोभोत्।अवोभू-
ताम्।अवोभूवुः।वोभवाञ्चकार।गुणाधिकानित्यत्वाद्वुक्।अवोभूवीत्॥अवोभोत्।अवोभूवुः॥अवोभूवीः॥अ
वोभोः।अवोभूवम्।पापचीति।पापक्ति।पापक्तः।पापचति।पापचीषि।पापक्षि।पापग्धि।अपापचीत्।अपापक्।अ
पापग्।अपापक्ताम्।अपापचुः।पापचाञ्चकार।अपापाचीत्।अपापचीत्॥ ढे·स्वरे·धिनोयधापागुणः।वोभुजी
ति।वोभोक्ति।वोभुग्धि।अवोभुजीत्।अवोभोक्।वोभोजिता।अवोभोजीत्।वावदीति वावति।वावदीतु।वावत्तु।वावद्धि
लुङि·अवावादीत्।अवावदीत्।जाघटीति।जाघट्टि।घुभिस्छः।जाघटिषा।लुङि·अजाघाटीत्।अजीघटीत्।स्पर्द्ध संघ
र्षे।पास्पर्द्धीति।पास्पर्द्धि।पास्पर्द्धः।हो।पास्पर्द्धि।अपास्पर्द्धीत्।अपास्पर्त्।अपास्पर्द्।अपास्पर्द्धाम्।अपास्पर्द्धुः॥
॥सिपि।अपास्पाः॥अपास्पर्द्धीः।अपास्पर्त्।अपास्पर्द्।गाधृ प्रतिष्ठालिप्सयोः ग्रन्थे च।जागाधीति।जागाद्धि।जाग

वं०भा०

हुः। आदिजवानामिति। जाघ्रासि। अजाघ्राधीत्। अजाघ्रात्। सिपि०। अजाघ्राः। अजाघ्रात्। नाध्य नानाधीति। नानात
ति। नानात्तः। नानाध्यति। दध्म दाद्याद्धि। दादद्धुः। दाधासि। अदाद्धीत्। अदाधत्। अदादध्माम्। अदादधुः। अदाध्यः। अ
दादधीः दादधिता। अदादाधीत्॥ अदादधीत्॥ मुह्। मोमुहीति। मोमोति। कुई खुई गुई गु हकौ उपामेव। चोकूर्दीति। चोक
कूर्त्ति। चोकूर्तः। अचोकूर्त्। सिपि। अचोकूः। ऋल्हला नामङ्उपधानाञ्च पूर्ववत्। कि स्वर्वस्य रूपकरिकरीक। चर्करीति। चर्कि
रीति। चरीकरीति। चर्कर्त्ति। चरिकर्त्ति। चरीकर्त्ति। चर्कृतः। चरिकृतः। चरीकृतः। चर्कृति। चरिकृति। चरीकृति। अचर्क
रीत्। अचरिकरीत्। अचरीकरीत्। अचर्कः। अचरिकः। अचरीकः। वर्हृतीति। वरिहृतीति। वरीहृतीति। वर्वर्त्ति। वरि
वर्त्ति। वरीवर्त्ति। सिपि। वावसाने। रुः। अवर्वाः। अवरिवाः। अवरीवाः। वनीवञ्चीति। वनीवक्ति। वनीवक्तः। वनीव
ञ्चति। वनीवञ्चीषि। वनीवङ्क्षि। वनीवञ्चात्। वनीवञ्चीतु। वनीवक्तु। वनीवक्ताम्। अवनीवञ्चीत्। संयोगान्त
स्य लोपः। अवनीवन्। जंगमीति। जङ्गन्ति। जंगतः। जंगतः। जंग्मति। जङ्गन्मि। जङ्गमीमि। जङ्गन्वः। जङ्गन्मः। जङ्गमी

राम०

तुजङ्गन्तु।होपरे।लोपस्त्वनुदात्ततनाम्।जङ्गहि।अजङ्गमीत्।अजङ्गन्।अजङ्गताम्।अजंगमुः।जंबनीति।जंबंति।
जंबतः।जंघ्नति।लोपस्त्वनुदात्ततनाम्।जंबहि।अजंबनीत्।अजंबन्।आशिषि।वध्यात्।अवधीत्।अवधिष्टाम्।च
स्कुरीति।चस्कूर्ति।चस्कूर्तः।चस्कुरति।चस्कूर्यात्।चस्कुरीतु।चस्कूर्तु।चस्कूर्तात्।चस्कूर्हि।अचस्कुरीत्।अचस्कूः।चोस्कु
न्दीति।चोस्कुन्ति।चोस्कुन्तः॥चोस्कुन्दति॥चोस्कुन्द्यात्।चोस्कुन्दीतु।चोस्कुन्तु।चोस्कुन्तात्।अचोस्कुन्दीत्
।अचोस्कुन्।अचोस्कुन्ताम्।अचोस्कुन्दुः।सिपि।अचोस्कुन्दीः।अचोस्कुन्।चंखनीति।चंखन्ति।चंखातः।चंखति
चंखनीषि।चंखंसि।चंखाथ।चंखनीमि।चंखन्वः।चंखन्मः।चंखायात्।चंखन्यात्।चंखनीतु।चंखन्तु।चंखातात्।
।चंखाताम्।चंखतु।चंखाहि।अचंखनीत्।अचंखानीत्।अचंखानिष्टाम्।पोपवीति।पोपोति।पोपूयात्।पोपोतु।
पोपवीतु।अपोपवीत्।नोनवीति।नोनोति।नोनूयात्।नोनवीतु।नोनोतु।अनोनवीत्।अनोनोत्।सिपि।अनोनवीः।
अनोनोः।जाहेति।जाहाति।जाहीतः।जाहयात्।हेस्तो।जाहेतु।जाहातु।जाहीतात्।जाहीताम्।अजाहेत्।अ

५५

धं०आ०

जाहात्। अजाहीताम्। अजा[illegible]हुः। जाहायात्। अजाहासीत्। अजाहासिष्टाम्॥ हादेति। दादाति। हात्तः। दाहति। हा
हेषि। दादेः। दाहुः। दामः। दाघात्। दंहो। देहि। दादेयात्॥ दादेः। ध्ये। अदादात्। एवं धेट्। दाधाति। दाद्धः। दाधति। धेहि। दा
धेयात्। अदाधीसीत्। अदाधात्। अदाधत्। डुधाञ्। दाधेति। दाधाति। धात्तः॥ दाधस्व। लुङि। अदाधात्। पितोस्तु देश। दाश्ल
वने। ददेति। दादीतः। दादति। दाघात्। दहीहि। दादाम्याद्। अदादासीत्। सास्वपीति। सास्वाप्ति। सास्वप्तः॥ सास्वपति। सास्व
प्सि। असास्वपीत्। असास्वप्। सास्वप्यात्। अस्वपीत्। असास्वापीत्। कॄ विक्षेपे। चाकरीति। चाकर्त्ति। चाकीर्त्तः॥ चाकिर
ति। तातरीति। तातर्त्ति। तातीर्त्तः। तात्यनिरति। तातीर्हि। तातरात्। अतातारीत्। अतातारिष्टाम्। अर्त्तेर्प्पद्ज्ञाकिद्वित्वे पूर्व
स्य रः इत्यत्वं रुगन्निग्नी कोस्तु पूर्वस्यासवर्णा इति रश। अरर्त्ति। अरिपर्त्ति। अरियर्त्ति। २। अररीति। अरिपरीति। अरियरीति। अर्त्त
तः। अरिर्तः। अरिर्तः। रुको रिलोपश्च निलोपश्च आरति। अरिपर्ति। अरिभर्ति। लिङि पादादावित्तिरिङ्। आरियात्। अरीरि
पात्। अरीरियात्। लङ्। आररीत्। लुङि। आरारीत्। आरिपारीत्। आरियारीत्। गॄ। जर्गृहीति। जर्गर्ति। जर्गृढः। जर्गृहति। अ

राम०

जर्घर्ढि।अजर्गृहीत्।ग्रह।जाग्रहीति।जाग्राढि।तस्मादोङिन्निमित्तं संप्रसारणम्।तस्य बहिरङ्गत्वेनासिद्धत्वान्न हलादिःपः।
जाग्रढः।जा[illegible]ग्रहति।जाग्रहीषि।जाग्राक्षि।जाग्रढः।जाग्रहितं।।गृधु।जर्गृधीति।जर्गर्द्धि।जर्गृद्धः।जर्गृधति।जर्गृधीषि
।जर्घर्त्सि।अजर्गृधीत्।अजर्घर्त्।सिपि।अजर्गृधीः।अजर्घाः।अजर्गृधीत्।अजर्गृधिष्टाम्।पाप्रच्छीति।पाप्रष्टि।ग्रसादीनां
संप्रसारणं श्नितपानिर्देशात्।छ्वोःरिति शे कृतेऽमे च षस्य शोऽवस्य ऊः।पाप्राष्टि।पाप्रष्टः।पाप्रश्मः।ह्वय गतौ।जाह
पीति।यवयोर्वसे हकारे च लोपः।जाहति।जाहतः।जाहपति।जाहयीषि।जाहषि।जाहयीमि।जाहावः।जाहामः।ह
र्यगतिकान्योः।जाहर्यीति।जाहर्ति।जाहर्यति।जाहर्हि।अजाहर्यीत्।अजाहः।अजाहर्त्तम्।अजाहर्युः।ज्वरत्वरस्त्रिवि
विमवामुपधावकारयोरूः।कोऽभसादोऽमादो हकारे च प्रत्यये परे।जाज्वरीति।जाजूर्त्ति।जाजूर्त्तः।जाजुर्वतः।।जाजू
र्मः।तातूरीति।तातूर्त्ति।सेस्रिवीति।सेस्रोति।मामवीति।मामोति।मामूतः।मामवीषि।मामाथः।मामूमः।मामवीतु
।मामोतु।मामूतात्।मामूहि।मामवानि।अमामवीत्।अमामोत्।सिपि।अमामवीः।अमामोः।अमामवम्।अमामा

चं०प्रा०

वा। अमाम्मूमारेफाच्छो र्लोपः। क्वौ मूसारेजमाऽदौहे प्रत्यये च॥ तुर्वी थुर्वी धुर्वी दुर्वी हिंसायाम्। तो तूर्वीति। तो
तोर्ति। तोतूर्त्तः। तोतूर्वीति। तोतूर्वीषि। जोतोर्षि। तोतूर्वः। तोतूर्मः। तोथोर्त्ति। तोथूर्त्तः। दोदोर्ति। दोधोर्ति। मुर्छा मोह स
मुच्छ्राययोः। मोमूर्छीति। मोमोर्ति। मोमूर्त्तः। मोमूर्छीति। मोमूर्म्मः॥ ०॥ इतियङ्लुङन्तप्रक्रिया॥ ध॥ नाम्नो पईचा
ऽस्य। नाम्न इच्छायामर्थे यप्रत्ययो भवति अवर्णस्य चईकारः। आत्मनः पुत्रमिच्छति पुत्रीयति। क्वचित्स्वरस्य यकारः। गा
मिच्छति गव्यति गव्यांचकार। त्वामिच्छति त्वघति। त्वघांचकार। हसाद्यस्य लोपो वा नापि नाम धातो। त्वघांचकार। मा
मिच्छति मघति। पुष्पघति॥ अस्मघति। काम्यच्च। पुत्रकाम्यांचकार। धनस्याकारो गर्द्धे। धनायति। अन्यत्र धनीयति
। उदकस्योदन पिपासायाम्। उदन्यति। अन्यत्रोदकीयति। गीर्य्यति। पूर्य्यति। दिवमिच्छति दिव्यति। अमुमिच्छति
अदस्यति। अतो रिः॥ ये। कर्त्रीयति। हसात्तद्धितयस्य लोपो ये। गार्गीयति॥ वाच्यति। कवीयति॥ समिध्यति। हसाद्य
स्य लोपो वाऽनपि नाम धातो॥ समिधांचकार। समिध्यांचकार। समिधिता। समिध्यिता। मान्तान्यपाम्यांयोना। कि

राम०

मिच्छति। इदमिच्छति। स्वरिच्छति। उच्चैरिच्छति। अश्ववृषयोर्मैथुनेच्छायाम्। अश्वस्यति वडवा। वृषस्यति गोः
क्षीरलवणयोर्लालसायाम्। क्षीरस्यति बालः। लवणस्यत्युष्ट्रः। सर्वनाम्नोपेलालसायां [illegible] सुगसुकौ। दधिस्यति। दध्य
स्यति बालः। मधुस्यति। मध्वस्यति। यशस्काम्यति। मान्ताव्ययाभ्यां काम्यः। किंकाम्यति। स्वःकाम्यति। उच्चैःकाम्य
ति। करणे च नाम्नः। नाम्नः करणेऽर्थे यः। नमस्यति। तपस्यति। वरिवस्यति। शब्दादिभ्योपङ्। शब्दायते। वैरायते। कल
हायते। अभ्रायते। मेघायते। कष्टायते। ऊष्मबाष्पधूमेभ्य उद्वमने। ऊष्मायते। बाष्पायते। धूमायते। चिर्डित्करणे। ना
म्नो चिप्रत्ययः करणेऽर्थे स च डित्। बटं करोति। बटयति। बटयते। अबबटत्। पटयति। अपपटत्। अल्लोपिनो नाङ्
कार्य्यम्। महान्तं करोति महयति। युवानं करोति यवयति। कनयति। आविष्ठवत्कार्य्यम्। स्फिरम्। स्फापयति। उरुं क्षे
क्षम्। उरुम्। वरयति। अववरत्। बहुलम्। बंहयति। अबबंहत्। वृद्धम्। वर्षयति। अववर्षत्। त्रप्रम्। त्रपयति। अतत्रपत्।
दीर्घम्। द्राघयति। अदद्राघत्। वृन्दारकम्। वृन्दयति। अववृन्दत्। अन्तिकम्। नेदयति। अनिनेदत्। स्थूलं करोति स्थ

चं०प्रा०

वपति।आ।तस्यवतत्।ह्रस्वंकरोतिह्रस्वयति।ह्रस्वयति।सेपयति।स्तोहयति।प्रियंकरोति प्रापयति।गुरुंकरोति।गरयति।स्थि
रंकरोतिस्थापयति।अतिष्ठपत्।ऊढिंकरोतिऊढयति।अरङ्।ह्रिस्वासुराहेयर।।अडि।पूर्वस्यठस्यजोवा औजिढत्।
औडिढत्।ऊढंकरोति।ऊढयति।औजढत्।औडढत्।कर्तुर्यङ्।उपमानात्कर्तुराचारे।श्येपङ्।श्येनइवाचरतिश्येनाय
ते काकः।परिडत्नायते।मूर्खः।यङिवासलोपः।पयायते।पयस्यतेवात्कमत्।अप्सरस्ओजसस्सुमनसांनित्यम्।।अप्स
रायते।ओजायते।सुमनायते।नाम्नआचारेक्विब्वा।कस्मति।अकस्मीत्।कस्मायते।।अइवाचरति।अति।अतः।अन्ति
लिङि।स्तत्।एताम्।।स्युः।लोटि।अतु।अतात्।अताम्।अन्तु।अ।अतात्।लङि।आत्।आताम्।आन्।आः।लिटि।
औ।अतुः।उः।इय।पात्।इत।आसीत्।मालेवाचरतिमालातिमालाञ्चकार।अमालासीत्।कविरिवाचरति।कवयति।
अकवयत्।नामधातोर्ह्रीद्विर्वासो।अकः।वयीत्।अकवापीत्।वि।रि।वाचरति।वयति।विवाय।विव्यतुः।अवयीत्।
अवायीत्।श्रीरिवाचरति।श्रयति।शिश्राय।शिश्रियतुः।अश्रयीत्।अश्रायीत्।पितेवाचरति।पितरति।यादा।

राम०

हाविनिरिङ्। पित्रियात्। गुरुगः। आपितरीत्। अपितारीत्। मूरिवाचरति। भवति। तुमाव। अमावीत्। डुरिवाचरति। द्रवति। द्रव
ति। अद्रावीत्। अमान्तस्याप वा पादीर्घः। क्रोष्ठ सा होहचङ्किः। इति। इदामिवाचरति। इदामति। राजाइवाचरति। राज्ञानति
। मम्याइवाचरति। मपीनाति। अमुष्मीणाति। पवति। इपाव। घूयात्। घविता। क इवाचरति। चकौ। चकेत्यन्ये॥ कयात्॥ कि
ता॥ सखेः॥ सस्वतुः॥ सस्वेत्यन्ये। आचारेऽउपमानात्। कर्मणः धर्मपोहपमानादाचारे ऽर्थेयप्रत्ययो ऽस्यचेकारः। पुत्रीयति। शि
ष्यमुपाध्यायः। प्रासादीयति कुट्यां भिक्षुः। भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। अभृशो भृशो भवति॥
भृशायते। अशाश्वत् शाश्वद्भवति शाश्वायते। क्विप्। भृशति। विरापि। भृशी भवति। भृशप भूत्। भृशपभूत्। ताम्रा। सुमना
यते। उपसर्गस्मिमाकारम्पूर्वपदस्यातुसंज्ञादेतौ घञ्पये विकीर्षिते एयान्त्रिपते। सुमनायते। सुखादिभ्यः कर्तृवे
दनभवे॥ सुखं वेदयते। सुखायते। दुःखायते। पुच्छादुदसने व्यसने पर्य्यसने चाणिङ्॥ विपुच्छयते। परिपुच्छयते।
भाण्डात् समाचयने। सम्भाण्डयते। चीवरादर्जने परिधाने च। चीवराणि अर्जयति परिधत्ते वा परिचीवरयते भिक्षुः। अ

चं०आ०

र्थवेदसत्यानामापुक्वक्तव्यो।। अर्थापयति। आर्तिथपत्।। वेदापयति।। सत्यापयति असस्यपत्। एनीवाचरति। एतयति। एपृथु
म्। प्रथयति। दृढ्लोसत्याप्पूर्ववाटिलोपः। अपप्रथत्। आपिप्रथत्। मृदुम्। म्रदयति।। अमम्रदत्। अमिम्रदत्। भृशं
कृशं दृढम्। भ्रशयति। क्रशयति। द्रढयति। अबभ्रशत्।। अचक्रशत्। अदद्रढत्। परिवृढं। परिव्रढयति। पर्यवव्रढत्। त्वां मां वा
ऽचष्टे। त्वादयति। मादयति। युष्मयति। अस्मयति। विद्वांसं। विद्वयति। अविविद्वत्। विदावयति। इत्यपरे। अविविदावत्। वि
दयति इत्यन्ये। अविविदत्। एवं श्वानमाचष्टे। श्वयति। अशिश्वयत्। शावयत्यपरे। शुनयत्यन्ये। उदञ्चम्। उदीचयति। उ
दैचिचत्। प्रत्यञ्चम्। प्रतीचयति। प्रत्यचिचत्। सम्यञ्चम्। समीचयति। सम्याचिचत्। तिर्यञ्चम्। तिरापयति। अतिति
रापत्। सध्र्यञ्चम्। सध्र्यापयति। अससध्र्यापत्। अन्तिकम्। नेदयति। अनिनेदत्। बाढम्। साधयति। वृद्धं ज्यापयति। अजि
ज्यपत्। वृद्धं वर्षयति। स्फिरं स्फापयति। उरुं वरयति। बहुलं बंहयति। तृप्रं त्रपयति। दीर्घं द्राघयति। वृन्दारकम्। वृन्दयति
।। इति नामधातुप्रक्रिया।। कण्ड्वादिभ्यो यक्। कण्ड्वादिभ्यो धातुभ्यो यक् स्यात् स्वार्थे। कण्डूञ् गात्रविघर्षणे।। कण्डूय

राम०

पति। कण्ड्‌ पते। मन्तु अपराधे रोषे च मन्तूयति। वल्गु पूजामाधुर्य्ययोः॥ वल्गूयति। असु असु असूञ् च उपतापे। अ
सूयति। असा न्वकार। असूयति। असूयते। लेला दीप्तौ। लेलायति। मेधा आशुग्रहणे मेधायति। सुरवड्ः खतत्कि
याम्॥ सुख्यति। इडःस्मति॥ सपर पूजायाम्। सपर्य्यति। सपरान्वकार। भिषज् चिकित्सायाम्। भिषज्यति। इषुधश
रधारणे। इषुध्यति ऐषुधीत्। गद्गद वाक्स्खलने। गद्गदयति। एला केला खेला विलासे। लरीड्· रोषे रोले लज्जायाञ्च
। महीड्· पूजायाम्। लरीयते। महीयते। अगद निरोगत्वे। अगदयति। आगदीत्॥०॥ इति कण्ड्वादयः॥ निविशा
देः॥ न्यादिपूर्वाद्विशादेर्धातोरात्त॥ निविशते। परिव्यवेभ्यः क्रियः। परिक्रीणीते। वि। अव। विपराभ्यां जेः। विजयते।
व्यजेष्ट। पराजयते। आङोदाञो ऽनास्यविकशने। विद्या। मादत्ते०आदित। आस्य विकशने तु व्याददाति मुखं कुसुमः
पराङ्कर्म्मकात्वत्येव॥ व्याददते पिपीलिकाः पतङ्गस्य मुखम्॥ क्रीड आङनुसंपरिभ्यः। आक्रीडते॥ अनुक्री
डते॥ परिक्रीडते॥ परिक्रीडते॥ समोऽकूजने॥ संक्रीडते। कूजने तु। संक्रीडति चक्रम्॥ आगमेः क्षमायाम्॥ आग

मेः स्मापाम्॥ आगमपस्वत्तावत्॥ शिक्षेर्जिज्ञासायाम्॥ धनुषि शिक्षते॥ हरतेर्गतताच्छील्ये॥ पैतृकमश्वा अनुहरंते
॥ मातृकङ्गावः॥ किरतेर्हर्षजीविकाकुलायकरणेषु॥ अपाच्चिरते सुदृचतुष्पाच्छकुनि कर्तके आलेखने॥
अपस्किरते॥ वृषोत्हृष्टः॥ कुक्कुटो भक्ष्यार्थी श्वाश्रयार्थी च॥ हर्षादिष्विति किम्। अपकिरति कुसुमं वायुः॥ आ
ङिनुप्रच्छोः॥ आनुते॥ आपृच्छते॥ शपउपालंभने॥ विप्राय शपते॥ समवप्रविभ्यः स्थः॥ संतिष्ठते॥ समास्थित॥
अवतिष्ठते॥ प्रतिष्ठते॥ वितिष्ठते॥ आङः प्रतिज्ञायाम्॥ शब्दं नित्यमातिष्ठते॥ स्वाभिप्रायाविष्करणे निर्णेत्राख्या
याञ्च॥ गोपीकृष्णायतिष्ठते॥ अस्मित॥ संशय्य कर्णादिषु तिष्ठते यः॥ उदोऽनूर्ध्वकर्मणि ईहायाम्॥ मुक्तावुत्तिष्ठ
ते॥ अनूर्ध्वकर्मणि किम्॥ पीठादुत्तिष्ठति॥ ईहायां किम्॥ ग्रामाच्छतमुत्तिष्ठति॥ उपान्मंत्रकरणे देवपूजासं
गतिकरणमित्रकरणपथिषु॥ आग्नेय्याग्नीध्रमुपतिष्ठते॥ मंत्रकरणे किम्॥ भर्तारमुपतिष्ठति यौवनेन॥ आदि
त्यमुपतिष्ठते। गङ्गा यमुनामुपतिष्ठते॥ रथिकानुपतिष्ठते॥ सुहृदमुपतिष्ठते पन्थाः॥ वा लिप्सायाम्॥ भिक्षुकः

राम॰

प्रभुमुपतिष्ठते॥ उपतिष्ठतिवा॥ अकर्मकाच्च॥ भोजनकाले उपतिष्ठते सन्निहितो भवतीत्यर्थः॥ ज्ञानमुपतिष्ठ
ते॥ उद्विभ्यान्तपोऽकर्मकात्स्वाङ्गकर्मकाच्च॥ उत्तपते वित्तपते पाणिं शिरोवा। अन्यत्र सुवर्णमुत्तपति संतापयति।
विलापयतिवेत्यर्थः। चैत्रो मैत्रस्य पाणिमुत्तपति संतापयतीत्यर्थः॥ आङो यमहनोऽकर्मकात्स्वाङ्गकर्मकाच्च॥
आयच्छते॥ आहते पाणिं शिरोवा॥ अन्यत्र शत्रुमायच्छति॥ आहन्तिवा॥ हनः सिः कित्त्व वधवाति॥ आवधिष्ट॥
आवधिषाताम्॥ आहत॥ आहसाताम्॥ यमः सूचने सिः कित्॥ उदायत॥ उदायसाताम्॥ उदायसत॥ सूचने किम्।
पापाहमुदायंस्त। आकूतं प्रकाशितवानित्यर्थः॥ समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिदृशिभ्योऽकर्मकेभ्यः॥ संगच्छते
॥ गमः सिस्यो कित्तौ वा॥ संगसीष्ट॥ संगंसीष्ट॥ समगत॥ समगंस्त॥ समृच्छते॥ संस्वरते॥ समस्वरित॥ समस्वर्त्त॥
॥ संपृच्छते॥ ऋसात॥ ष्ठशषहाजादेःषः॥ छुमिषुः॥ समपृष्ट॥ समपृक्षाताम्॥ संशृणुते॥ संश्रोता॥ समश्रोष्ट॥ सं
विते॥ संविद्राते॥ वेत्तेरन्तो वा रुडाति॥ संविदते॥ संविद्रते॥ संपश्यते॥ अकर्मकात्किम्॥ ग्रामं संगच्छति॥ उपस

गोदस्यतस्ह्योर्वा ॥ निरस्यते ॥ निरस्यति वा ॥ निरास्यत ॥ समूहति ॥ समूहते ॥ निसमुपविभ्यो ह्वः ॥ निह्वयते ॥ स्पर्द्धाया
माङः ॥ कृष्णश्चाणूरमाह्वयते ॥ स्पर्द्धायां किम् ॥ पुत्रमाह्वयति ॥ अप्रतिबन्धोत्साहस्फीततासु क्रमः ॥ आचिक्रमते
बुद्धिः ॥ अध्ययनाय क्रमते ॥ क्रमन्तेऽस्मिन् शास्त्राणि ॥ उपपराभ्यां ॥ उपक्रमते ॥ पराक्रमते ॥ आङो ज्योतिरुद्ग
मने ॥ आक्रमते सूर्यः ॥ वेः पादविहरणे ॥ साधु विक्रमते वाजी ॥ प्रोपाभ्यां समर्थाभ्याम् ॥ प्रक्रमते ॥ उपक्रमते
॥ अनुपसर्गाद्वा ॥ क्रमते ॥ क्रामति ॥ अपह्नवे ज्ञः ॥ शतमपजानीते ॥ अकर्मकाच्च ॥ सर्पिषो जानीते ॥ संप्रतिभ्या
मनाध्याने ॥ शतं संजानीते ॥ शतं प्रतिजानीते ॥ अनाध्याने किम् ॥ मातरं संजानाति ॥ अनुपसर्गाद्वा ॥ गां जानाति जा
नीते वा ॥ भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ शास्त्रे वदते ॥ भृत्यानुपवदते ॥ शास्त्रे वदते ॥ क्षे
त्रे वदते ॥ गृहे विवदन्ते ॥ उपवदते वा ह्लंसाः ॥ मनुष्यादीनां समुच्चारणे ॥ संप्रवदन्ते ब्राह्मणाः ॥ व्यक्तवाग्विष
यादनुपूर्वादकर्मकात् ॥ अनुवदते ॥ कठः कलापस्य ॥ वा विप्रलापे ॥ विप्रवदंति ॥ विप्रवदन्ते वा वैद्याः ॥ अ

राम०

वाजिरते॥ अवगिरते॥ समः प्रतिज्ञाने॥ शब्दं नित्यं संगिरते॥ उदश्चरः सकर्मकात्॥ धर्ममुच्चरते॥ सकर्मकात् कि
म्। बाष्पमुच्चरति। उपरि स्थाज्जच्छतीत्यर्थः॥ समस्तृतीयायुक्तात्॥ रथेन संचरते॥ दाणश्च सा चेच्चतुर्थ्यर्थे॥ दास्या सं
प्रयच्छते॥ कामुकः॥ उपायमः स्वीकारे॥ भार्यामुपयच्छते॥ यमास्सिच् किद्वा विवाहे॥ रामः सितामुपायत॥ उपा
यंस्त वा॥ वेः शब्दकर्मणः॥ क्रतीअश॥ शब्दान्विकुरुते॥ अकर्मकाच्च॥ विकुर्वते सैन्धवाः॥ ज्ञाश्रुस्मृदृशां सम्ना
नामात्॥ जिज्ञासते॥ शुश्रूषते॥ सुस्मूर्षते॥ दिदृक्षते॥ अनोर्ज्ञानातेर्न्न॥ अनुजिज्ञासति पुत्रम्॥ प्रत्याङ्
भ्यां श्रुवः॥ प्रतिशुश्रूषति॥ आशुश्रूषति॥ स्वराद्यन्तोपसर्गाद्युजेरयज्ञे॥ प्रयुंक्ते॥ उपयुंक्ते॥ उद्युंक्ते॥ अयज्ञे
किम्॥ द्वंद्वं न्यंचि॥ पात्राणि प्रयुनक्ति॥ समः क्ष्णुवः॥ संक्ष्णुते शस्त्रम्॥ भुजोऽपालने॥ ओदनमभुंक्ते॥ पालने तु
॥ महीं भुनक्ति॥ गृधिवञ्चिभ्यां ण्यन्ताभ्यां प्रतारणे॥ माणवकं वञ्चयते॥ गर्द्धयते॥ प्रतारणे किम्॥ श्वानं गर्द्धयति
अभिकांक्षामस्योत्पादयतीत्यर्थः॥ अपाद्वदः॥ न्यायमपवदते॥ कर्मव्यतिहारे धातोः॥ व्यतिभवते॥ व्यतिराते॥

चं०आ०

नगतिहिंसार्थपठजल्पहसात्॥व्यतिगच्छन्ति॥व्यतिघ्नन्ति॥व्यतिजल्पन्ति॥व्यतिहसन्ति॥इतरेतरान्योऽन्यपरस्प
रोपपदाच्च॥न॥इतरेतरस्य अन्योऽन्यस्य परस्परस्य वा॥व्यतिलुनन्ति॥व्यतिपठन्ति॥अनुपराभ्यांकृञः पम्॥अ
नुकरोति॥पराकरोति॥अभिप्रत्यतिभ्यःक्षिपः पम्॥अभिक्षिपन्ति॥प्रतिक्षिपन्ति॥अतिक्षिपन्ति॥प्राद्वहः प
म्॥प्रवहन्ति॥परेर्मृषश्च॥परिमृष्यन्ति॥परिवहति॥इतिपदव्यवस्था॥०॥प्रक्रचतुष्टं॥धातोर्भावकर्म्मणोश्चयक्
प्रत्ययः स्यात्लिङादिषुचतुर्षुपरतः॥अमुविकर्म्मणि॥अकर्म्मकाधातवो भावे सकर्म्मकाश्चकर्म्मणि भवन्ति॥भावस्यैक
त्वादेकवचनमेव॥नामाद्यविषयत्वेऽपि प्रथमातिक्रमे कारणाभावात्प्रथमः॥भूयते॥भूयेत॥भूयताम्॥अ
भूयत॥बभूवे॥स्वरान्तानां हन्ग्रहदृशां च भावकर्म्मणोः स्मिसतासस्यपयामिञ्चासइरावच्च॥भाविषीष्ट॥भविषी
ष्ट॥भाविता॥भविता॥भाविष्यते॥भविष्यते॥अभाविष्यत॥अभविष्यत॥इणन्तस्य कर्त्तरि॥धातोस्तनिपरे भावक
र्म्मणि चइण्प्रत्ययः सेरपवादः॥लुङ्॥अभावि॥अकर्म्मकोऽप्युपसर्गवशात्सकर्म्मको भवति॥सुखमनुभूयतेत्वा

राम०

भिन्ना ॥ लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितनिधनताप्यामकर्म्मकः ॥ धातुस्तयोर्धर्म्मिभेदे सकर्म्मक उदा
हृतः ॥ २ ॥ धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ॥ प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया ॥ ३ ॥ शीङोऽयङ् ये
ङिति ॥ शय्यते ॥ शिश्ये ॥ शायिषीष्ट ॥ अशायि ॥ अयङि ॥ वृटः क्रियते ॥ त्वन्तुः स्वीक्रियसे भोगैर्विरागैः सुखमहं क्रिये ॥ च
क्रे ॥ भाव्यते ॥ भावयाञ्चक्रे ॥ भावयाम्बभूवे ॥ भावयामासे ॥ इणवदिटि चेल्लोपः ॥ भाविता ॥ भावयिता ॥ भाविष्यते ॥ भा
वयिष्यते ॥ अभावि ॥ अभाविषाताम् अभावयिषाताम् ॥ सन्नन्तात् ॥ बुभूष्यते ॥ यतः ॥ बुभूषाञ्चक्रे ॥ अबुभूषि ॥ यङन्ता
त् ॥ बोभूय्यते ॥ बोभूयाञ्चक्रे ॥ यङ्लुगन्तात् ॥ बोभूयते ॥ बोभवाञ्चक्रे ॥ बोभाविष्यषीष्ट ॥ बोभविषीष्ट ॥ स्तूयते विष्णुः
॥ अस्तावि ॥ अस्ताविषाताम् ॥ अस्तोषाताम् ॥ अर्य्यते ॥ आरे ॥ आरिषीष्ट ॥ ऋषीष्ट ॥ स्मर्य्यते ॥ स्मारिता ॥ स्मर्ता ॥ धा
तोर्लोपिनः ॥ अस्मारि ॥ इज्यते ॥ तनोतेर्वा आत्वं यकि ॥ तायते ॥ तन्यते ॥ तनिषीष्ट ॥ अतानि ॥ जायते ॥ जन्यते ॥ तपोऽनेरप
कर्म्मकर्त्तरि ॥ अन्वतप्त पापेन ॥ दादेरिणः ॥ दीयते ॥ ददे ॥ आतो युक् ॥ इणि चिण्कृति च ॥ दायिषीष्ट ॥ दासीष्ट ॥ अ

दापि॥ अदापिषाताम्॥ अदिषाताम्॥ धीयते॥ ध्यायते॥ अग्लापि॥ हन्यते॥ घानिषीष्ट। वधिषीष्ट॥ हन्ता॥ घानिता॥ अ
घानि॥ अघानिषाताम्॥ अहसाताम्॥ अवधि॥ अवधिषाताम्॥ ग्रहोऽलिटि दीर्घः॥ ग्राहिता॥ ग्रहीता॥ दर्शिषीष्ट। दृक्षी
ष्ट॥ दर्शिता॥ द्रष्टा॥ अदर्शि॥ अदर्शिषाताम्॥ अदृक्षाताम्॥ शम्यते मुनिना॥ मान्तस्य सेटो न वृद्धिरिति चिणि कृति
च न त्वाचमिकमिवमीनाम्॥ अशमि॥ अदमि॥ आचामि॥ अकामि॥ अवामि॥ ण्यन्तात्तु॥ शाम्यते मोहो मुनिना॥ शमयाञ्
चक्रे॥ मितां ज्मनानामि॥ चिणामि च वा दीर्घः॥ शामिता॥ शमिता॥ शमयिता॥ अशामि॥ अशमि॥ अशामिषाताम्
॥ अशमिषाताम्॥ अशमयिषाताम्॥ वध हिंसायाम्॥ जनिवध्योर्न वृद्धिः॥ अवधि॥ भञ्जेश्चिणि नलोपो वा॥ अभा
ञ्जि॥ अभञ्जि॥ लभेश्चिणमोर्नुम् वा॥ अलम्भि॥ अलाभि॥ गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्॥ बुद्धिभक्षा
र्थयोः शब्दकर्मकाणां निजेच्छया॥ प्रयो[illegible]ज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः॥ गौर्दुह्यते पयः॥ देवदत्तेन
अजा ग्रामं नीयते॥ ह्रियते॥ कृष्यते॥ उह्यते॥ बोध्यते माणवकस्य धर्मः॥ माणवको धर्ममिति वा॥ भोज्यते माणवकमो

दनःओदनंमानवकोवा॥पठ्यतेमानवकंवेदःमानवकोवेदमितिवा॥देवदत्तोग्रामंगम्यते॥अकर्मकाणांकालादि
कर्मकाणांभावेकर्मणिचलकारः॥मासंमासोवास्यतेदेवदत्तेन॥क्रोशःक्रोशंवास्यते॥कुरवःकुरून्वास्यते॥गो
दोहंगोदोहोवास्यते॥ण्यन्तानुप्रयोज्येप्रत्ययः॥मासमास्यतेमानवकः॥यदासौकर्मातिशयंद्योतयितुंकर्तृव्या
पारेणविवक्ष्यतेतदाकारकान्तराण्यपिकर्तृसंज्ञांलभन्ते॥साध्वसिश्छिनत्ति॥काष्ठानिपचन्ति॥स्थालीपचति
॥पच्यतेओदनेनभिद्यतेकाष्ठेन।अपाचि॥अभेदि॥लेनोक्तेकर्मकर्तरियगादिणिवदिटः॥पच्यतेओदनः॥भि
द्यतेकाष्ठम्॥पक्षीष्ट॥अपावि॥अभेदि॥सकर्मकाणान्तु॥अजाग्रामंनयति॥दुहिपच्योःसकर्मकयोर्वा॥दु
हस्नुनमांकर्मकर्तरियक्चिणोन॥गौःपयोदुग्धेदोग्धिवा॥स्वरान्तानांकर्मकर्तरिएवात्तनि॥अकारि॥अकारिष्ट
अकृतकटस्स्वयमेव॥दुहश्च॥धुक्षीष्ट॥अदोहि॥अधुक्षत॥अधुक्षत॥अदुग्ध॥उदुम्बरःफलंपच्यतेपचतिवा॥प्रस्नु
तेगौःपयः॥स्नुक्रमोरात्मनेट्॥प्रास्नोष्ट॥प्रास्नाविष्ट॥नमतेदण्डः॥अनंस्त॥सृजेःश्रद्धोपपन्नेकर्तरिच॥सृज्यतेस्र

चं०भो०

जम्भक्तः॥ असर्जि॥ युजे वी॥ पुज्यते ब्रह्मचारी योगं पुनाति॥ भूषावाचिनां किरादीनां सन्नानाज्ज्वयगी॥ रीरावदि
टोन॥ अलंकुरुते कन्या॥ अलमकृत॥ अवकिरते हस्ती॥ अवाकीर्ष्ट॥ अवगिरते पुष्पम्॥ अवागिर्ष्ट॥ आद्रियते दान
म्॥ आदृत॥ ध्रियते॥ अधृत॥ पृच्छते॥ अपृष्ट॥ विकीर्यते कटः॥ अविकीर्षिष्ट॥ भिश्रिद्रुस्रुभ्यः ग्रन्थिग्रन्थ्यादकर्म्मका
णां च पिण्योन॥ कारयते॥ अचीकरत॥ उच्छ्रयते दण्डः॥ उदशिश्रियत॥ दुनोते कष्या॥ अवोचत॥ ग्रन्थ्यते ग्रन्थः॥ अग्र
न्थिष्ट॥ विकुर्वते सैन्धवाः॥ व्यकारिष्ट॥ व्यकृत॥ कुषिरञ्जोः कर्म्मकर्तरि वा ऽऽदन्वादो॥ कुष्यति कुष्यते वा पादः
॥ रज्यति॥ रज्यते वा वस्त्रम्॥ अकोषि॥ अरञ्जि॥ इति भावकर्म्मप्रक्रिया॥ ०॥ स्मृति वा विन्यपपदे भूतानद्यतने धा
तोर्लट् लृङः प्रवादः॥ स्मरसि कृष्ण गोकुले वत्स्यामः॥ यद्योगे उक्तम्॥ अभिजानासि कृष्ण यद्वने भुञ्ज्महि॥ उ

राम०

त्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम्॥ सुप्तो ऽहं किल विललाप॥ अत्यन्ताऽपह्नवे च॥ कलिङ्गेषु वात्सीः
॥ नाहं कलिङ्गान् जगाम॥ हशश्वतोर्लङ् च॥ इति हाकरोत्॥ चकार वा॥ शश्वदकरोत्॥ चकार वा॥

आसन्नकालेऽपृच्छ्यमानेऽर्थे [illegible] लङ्लिटौ ॥ अगच्छत् किम् ॥ जगाम किं ॥ अनासन्ने तु कंसं जघान किल ॥ स्मे लट् ।
लिटोऽपवादः ॥ यजति स्म युधिष्ठिरः ॥ भूताऽनद्यतने लट् स्मयोगे ॥ एवं स्म पिता ब्रवीति ॥ ननौ पृष्ट[illegible]प्रतिवचने भूते
लट् ॥ अकार्षीः किम् ॥ ननु करोमि भोः ॥ नन्वोर्वा ॥ अकार्षीः किम् ॥ न करोमि । नाकार्षम् ॥ अहं नु करोमि ॥ न्वकार्षम् ॥
पुरा च स्मयोगे भूताऽनद्यतने वा लुङ्लिटौ न तु स्मयोगे ॥ वसन्तीह पुरा छात्राः ॥ अवात्सुः ॥ अवसन् ॥ ऊषुर्वा ॥ यजति
पुरा युधिष्ठिरः । यावत्पुरानिपातयोर्भविष्यति लट् ॥ यावद्भुङ्क्ते ॥ पुरा भुङ्क्ते ॥ कदाकर्ह्योर्वा भविष्यति लट् ॥ कदा कर्हि
वा भुङ्क्ते ॥ भोक्ष्यते भोक्ता वा ॥ वर्तमानसमीपे भूते भविष्यति च वर्तमानवद्वा ॥ कदागतोऽसि ॥ अयमागच्छामि ॥ अ
यमागमम् ॥ कदागमि ॥ ष्यसि ॥ एष गच्छामि ॥ गमिष्यामि वा ॥ क्षिप्रवचने ऌट् ॥ वृष्टिश्चेत्क्षिप्रमाशुत्वरितं वा यास्य
ति तदा शीघ्रं वप्स्यामः ॥ गर्हायां लडपिजात्वोः कालत्रये ॥ अपि जायां त्यजसि जातु गणिकामाद्रियसे ॥ वा कथमि
ति लिङ्लटौ गर्हायां कालत्रये ॥ कथं त्वं धर्मं त्यजेः त्यजसि वा ॥ जातु यत्र यदा यदि योगे लिङ्लटोऽपवादः ॥ जातु य

५४

चं०ओ०

त्परापरितात्पादरिं निन्दो त ॥ नावकल्पयामि ॥ न मर्षयामि ॥ उत्ताप्योर्वोढार्थयोर्लिङ् ॥ उत अपि वा हन्यादवं हरिः ॥ स्वामि
भिप्रायाविःकरणे गम्येलिङ् ॥ ननु कच्चिति ॥ कामो मे भुञ्जीत भवान् इति ॥ कच्चिति किम् ॥ कच्चिज्जीवति मे माता ॥
हेतुहेतुमतोर्भविष्यतिलिङ् वा ॥ कृष्णं नमेच्चेत्सुखं यायात् ॥ कृष्णं नंस्यति चेत्सुखं यास्यति ॥ इच्छार्थेभ्यो लिङ्
लटौ वर्तमानार्थे ॥ कामयते ॥ ॥ कामयेत ॥ पौनःपुन्ये भृशार्थे च धातोर्लोट् सर्वलकारविषये ॥ तस्य हिस्वौ सर्व
पुवादिविषये ॥ तध्वमोर्विषये वा ॥ क्रियासमभिहारे द्वित्वं तस्यैव धातोरनुप्रयोगश्च ॥ अनेकाक्रियासमुच्चये
लोट् तस्य हिस्वौ तध्वमोर्विषये वा हिस्वौ ॥ समानार्थस्य धातोरनुप्रयोगात्तिवादयः ॥ याहि याहीति याति ॥ एवं
यातः ॥ यान्ति ॥ यासि ॥ याथः ॥ यात यातेति रूपम् ॥ याथ ॥ यामि ॥ यावः ॥ यामः ॥ याहि ॥ याहीति ॥ यास्यति अयासीत् ॥
अधीष्व अधीष्वेत्यधीते ॥ एवमन्यत्रापि ॥ ध्वं विषये प्राग्वत्पक्षे ॥ अधीध्वमधीध्वमिति रूपं अधीध्वे ॥ शक्तून्पिब धाना खा
देत्यभ्यवहरति पिबतखादतेत्यभ्यहरथ ॥ अन्नं भुंक्ष्व दाधिकमास्वादस्वेत्यभ्यवहरते ॥ भुंग्ध्वमास्वादध्वमित्यभ्यवहरध्वे ॥ इत्याख्यातप्र

राम०

॥कृत्कर्त्तरि॥ वक्ष्यमाणः प्रत्ययाः कृत्संज्ञकास्तेच कर्त्तरि भवन्ति॥ तृवुणौ॥ धातोः॥ पक्ता॥ कृतः॥ वसादेः कृतइट्
॥भविता॥ कुटिता॥ गोपायिता॥ गोपिता॥ गोप्ता॥ सहिता॥ सोढा॥ एषिता॥ एष्टा॥ णुवोरनाकौ॥ पाचकः॥ भावकः
॥आतोयुक्॥ दायकः॥ घातकः॥ जनकः॥ घटकः॥ दरिद्रायकः॥ कोटकः॥ शमकः॥ नियामकः॥ कर्मेः कर्त्तर्य्यो॥ द्वि
षयात् कृतइरान॥ द्वेषकः॥ नाम्युपधात्कः॥ क्षिपः॥ बुधः॥ हनः॥ प्रीकृज्ञाम्यश्च॥ प्रियः॥ किरः॥ ज्ञः॥ उपसर्गे आद
न्तात्॥ प्रदः॥ सुग्लः॥ पचिनन्दिग्रहादेरणिनि॥ पचादेरः॥ नन्द्यादेर्युः॥ ग्रहादेर्णिनिः॥ पचः॥ वदः॥ चलः॥ पतः॥ च
रः॥ चरिचलिपतिवदीनां वा द्वित्वमक्पूर्वस्याऽक् अप्रत्यये॥ चराचरः॥ चलाचलः॥ पतापतः॥ वदावदः॥ हन्तेर्हे
स्य घत्वञ्च॥ घनाघनः॥ पाटेर्णिलुक्चोक्च दीर्घश्च पूर्वस्य॥ पाटूपटः॥ हनः॥ पाटः॥ नन्दनः॥ वामनः॥ दूषणः॥ सा
धनः॥ वर्द्धनः॥ शोभनः॥ रोचनः॥ रावणः॥ सहनः॥ मदनः॥ पतनः॥ जल्पनः॥ रात्वान्निपात्यम्॥ लवणम्॥ कुचश
ब्दे॥ कोचनः॥ म्लेच्छ अव्यक्ते शब्दे॥ म्लेच्छनः॥ ग्राही॥ उत्साही॥ उद्भासी॥ स्थायी॥ मायी॥ मन्त्री॥ अपकारी॥ अपवादी॥

॥अपराधी॥ दशादेपशः॥ दशापाद्या आयेटांशः॥ शितिवत्तुर्वत॥ चतुर्षु तिवारिषु पत्कार्य्यमुक्तन्नच्छितिपरे भवति॥
पश्यः॥ क्षपः॥ श्वमः॥ जिघ्रः॥ पिवः॥ घ्रस्सञ्ज्ञायान्न॥ व्याघ्रः॥ अनुपसर्गे ल्योलिम्पविन्दधारिपारिवेद्युदेजिचेतिसा
तिसाहिभ्यश्श॥ लिम्पः॥ विन्दः॥ धारयः॥ पारयः॥ वेदयः॥ उद्वेजयः॥ चेतयः॥ सातसुखे॥ सातयः॥ [illegible]
[illegible] साहयः॥ नौ लिम्पः॥ निलिम्पा॥ गवादिषु विन्दे स्सञ्ज्ञायाम्॥ गोविन्दः॥ अरविन्दम्॥ दाम्नधाञ्जो वी॥ द
दः॥ दधः॥ ज्वालादेर्णः॥ ज्वालः॥ तायः॥ दायः॥ धायः॥ श्यादेश्च॥ श्ये प्रेङ्गतौ॥ अवश्यायः॥ कार्य्येण॥ कर्म्मण्युप
पदे धातोरण॥ कुम्भकारः॥ [illegible]॥ स्वर्गह्वायः॥ तन्तुवायः॥ धान्यमायः॥ शीलिकामिभक्ष्याचरि स्समी॰
रिभ्यो णः॥ मांसशीला॥ मांसकामा॥ मांसभक्षा॥ कल्याणाचारा॥ सुखप्रतीक्षा॥ बहुक्षमा॥ आतोऽः॥ कर्म्म॰ राम॰
ण्युपपदे आदन्तात् डः॥ गोदः॥ धनदः॥ पार्ष्णित्रा॥ नाम्नि च॥ नाम्नि डुपपदे धातोर्डः॥ द्विपः॥ गृहस्थः॥ गिरिशः
॥पादपः॥ सुचः प्रहे॥ सुचन्द्रवतीति स्पृहः॥ उरसस्सलोपो मुम्वा डाने गमौ॥ उरगः॥ उरङ्गः॥ विहायसो विहो मुम्वा डा

नेगमो॥ विहगः॥ विहङ्गः॥ भुजन्तुरयोर्मुम्वा डा नेगमो॥ भुजगः॥ भुजङ्गः॥ तुरगः॥ तुरङ्गः॥ प्रसारशीण्योडः॥ कोऽपवा
दः॥ प्रज्यः॥ आरूः॥ प्रकः॥ तुन्दशोकयोः परिमृजापनुदोः॥ आलस्यसुखाहरणयोः कः॥ तुन्दपरिमृजोऽलसः॥ शोऽ
कापनुदः॥ सुखस्याहर्ता॥ मूलविभुजादेः कः॥ मूलानि विभुजतीति मूलविभुजो रथः॥ महीध्रः॥ गिलः॥ गरष्क॥
सामगः॥ सामगी॥ पिबतेः सुराशीध्वोः॥ सुरापी॥ शीधुपी॥ अटौ॥ नाम्नि कार्य्ये चाकारटकारौ भवतः॥ अस्त्रिहरश्च वा
॥ कवचहरः कुमारः॥ धनुर्हरोऽपुवा॥ कुरुचरः॥ पुरःसरः॥ अग्रेसरः॥ पार्श्वशयः॥ पृष्ठशयः॥ शक्तिग्रहः॥ पूजार्हः
॥ [illegible] स्तो॥ कर्णेजपः॥ शूचकः॥ यशस्करी विद्या॥ श्राद्धकरः॥ वचनकरः॥ कर्मकरः॥ दिवाकरः॥ निशाक
रः॥ रखारवि॥ नाम्निकर्य्ये च॥ खित्यनव्ययस्य॥ खिदन्ते परे नव्ययस्य पूर्वपदस्य मुम॥ शकृत्करि [illegible]
तीति फलेग्रहिः॥ फलस्येदन्तत्वं निपातनात्॥ इति हरति हरिः॥ मायहरिः॥ देवापिः॥ वातापिः॥ सर्वंकषः॥ कूलंकषा
॥ करीषंकषा॥ वाचंयमादयो निपात्याः॥ वाचंयमः॥ पुरन्दरः॥ द्विषन्तपः॥ परन्तपः॥ कुक्षिम्भरिः॥ उदरम्भरिः आत्मम्भ

चं०सिं०कौ०

रिः॥ आशितेभुवोभावकरणयोः॥ आशितेनभूयतेइति आशितंभवः॥ आशितोभवत्यनेनेति आशितम्भवः॥ ओद
नः॥ एजेःखश्॥ जनमेजयः॥ पारिंतमन्य॥ भुजन्धयः॥ कूलन्धयः॥ खप्रान्तेपूर्वपदस्याऽनव्ययस्यह्रस्वः
॥ मुष्टिन्धयः॥ नाडिन्धयः॥ नासिकन्धयः॥ अनव्ययस्यकिम्॥ दिवामन्यारात्रिः॥ दोषामन्यमहः॥ कूलमुद्रुजः॥
कूलमुद्वहः॥ अरुन्तुदः॥ दारावाऽऽहनोऽणन्तस्यचटस्संज्ञायाम्॥ हनोघत॥ दार्वाघाटः॥ चारौवा॥ चार्वाघा
टः॥ चार्वाघातः॥ कर्मणिसमिच॥ वर्णान्संहन्तीतिवर्णसंघातः॥ वर्णसंघाटः॥ पदसंघाटः॥ पदसंघातः॥ जायाप
त्योश्चलक्षणवत्कर्त्तरि॥ जायाघ्नः॥ पतिघ्नीस्त्री॥ अमनुष्यकर्तृकेच॥ पतिघ्नीपाणिरेखा॥ जायाघ्नस्तिलकालकः॥ पा
णिघताड्यौशिल्पिनि॥ राजघश्चनिपात्यते॥ शिल्पिनिकिम्॥ पाणिघातः॥ ताडघातः॥ राजघातः॥ भजांदिरा॥ वेर्लोपः

राम०

॥ अर्द्धभाक्॥ सुखभाक्॥ तुराषाट्॥ भारवाट्॥ मोनोधातोः॥ प्रशान्॥ अर्द्धतनत्रावेक्षम्॥ क्विप्योगेनाम्नाः॥ च्वौदीर्घई
चऽस्य॥ च्वौप्रत्ययेपरेऽवर्णस्यईत् उतोर्दीर्घः॥ मिथुनीकरणम्॥ शुक्लीभावः॥ सहायीस्यात्॥ शुचीभवति॥ हेतृकृतम्॥

च्चौसलोपः॥सुमनीभावः॥अरूकरोति॥चरस्करोति॥सुचेतीकरोति॥रहीभवति॥विरजीकरोति॥काविड्डु॥दुःखाकरो
ति॥सुखाकरोति॥शम्बाकरोति॥द्विगुणाकरोति॥बीजाकरोति॥अव्ययस्यच्चावीत्वन्न॥दोषाभूतमहः॥दिवाभूतारात्रिः॥ह
सात्यरस्या ऽ पत्यपकारस्यलोलोपश्छ्रो॥गार्गीभवति॥ईङ्क्मतः॥मात्रीकरोति॥विविधपेसाद्या॥सात्यदाधोस्सस्यषत्वन्न॥अ
ग्निसाद्भवति॥अग्नीभवति॥सम्पदायोगेच॥जलसात्सम्पद्यते॥अधीने॥राजसात्सम्पद्यते॥राजसात्करोति॥देयेत्राच॥वि
प्राधीनंदेयंकरोति॥विप्रत्राकरोति॥विप्रत्रासम्पद्यते॥विप्रसात्करोति॥देवमनुष्यपुरुषपुरुमर्त्येभ्योबात्रा॥देवत्रावन्दे॥देवंव
न्दे॥खुट्करणो॥आद्यसुभगस्थूलपलितनग्नान्धप्रियेषुच्व्यर्थेषुअपदेषुकृञःकरणो॥ख्युन्॥पत्ययः॥अनाढ्यमाढ्यंकु
र्वन्त्यनेना ऽ ऽ ढ्यंकरणाम्॥भुवः खिष्णुचखुकञौकर्त्तरि॥अनाढ्य आढ्योभवतीति आढ्यंभविष्णुः॥आढ्यंभावुकः॥आतोम
निश्क्वनिश्वनिपः॥नाम्न्युपपदे आदन्ताद्धातोरेतेभवन्ति॥सुष्ठुददातीतिसुदामा॥अश्वत्थामा॥स्थामी॥नादोकितिदो
सोमास्थामिर्भवतिसघोवी॥अपिद्धाधागेहाक्वपिवतीनामि॥किनिहसेनाकिंपिकापिच॥सुष्ठुपिवतीतिसुपीवा॥घञ

पीवा॥अनादन्तादपिक्वचित्॥सुकर्म्मा॥अपिशब्दान्निरुपपदेभ्योपि॥ह्रस्वस्यापितिकृतितुक्॥प्रातः एतीति प्रातरि
त्वा॥वनोर्यश्चमान्तस्यात्वम्॥विशेषेराजायतेइतिविजावा॥ओरार अग्रनयने॥अवावा॥पारदृश्वा॥राजानंयोधयती
तिराजयुध्वा॥सुत्वा॥धीवा॥पीवा॥क्विप्धातोः॥कर्म्मकृत्॥मोनोधातोः॥प्रशान्॥अग्निचित्॥सोमसुत्॥सोमपाः॥स
दीरक्॥दिशतीतिदिक्॥क्विपिवचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणञ्च॥क्विः॥तिभ्रूसेभ्रौत्रमे च छस्यशोव
स्यऊः॥वक्तीतिवाक्॥तत्वप्राट्॥तत्वप्राशो॥तत्वप्राशः॥आयतंस्तौतीति॥आयतस्तूः॥आयतस्तुवौ॥आयतस्तुवः॥
कटप्रूः॥जुङ्गतौ॥जूः॥जुवौ॥श्रयति हरिमितिश्रीः॥ध्यायतेःक्विपिसम्प्रसारणम्॥सुष्ठुध्यायतीतिसुधीः॥गमादीनां
गमस्यलोपःक्विपिक्वापिच॥अंगंगच्छतीति अंगगत्॥परितस्तनोतीतिपरीतत्॥संयत्॥सुष्ठुनमतीतिसुनत्॥ऊङ्च॥अ
ग्रेगच्छतीति अग्रेगूः॥अग्रेगुवौ॥अग्रेभ्रूः॥अग्रेभ्रुवौ॥द्युतिगमिजुहोतीनांक्विपि द्वित्वम्॥द्योतेःइते इतिदिद्युत्॥गच्छतीति
जगत्॥जुहोतेर्दीर्घः॥जुहोतीतिजुहूः॥ध्वौवा॥जुह्वौ॥पदान्तस्याग्नितेर्नस्यणात्वमुपसर्गस्थान्निमित्तात्॥प्रकर्षेण

राम०

अग्नितिष्ठाणः॥ शासेरिः॥ मित्राणि शास्तीति मित्रशीः॥ मित्रशिषौ॥ मित्राशिषः॥ घसादेः षः॥ आशासः क्वावुपधा
या इत्वम्॥ आशास्ते इति आशीः॥ गिरतीति गीः॥ पिपर्तीति पूः॥ इसमन्त्रक्विषु छादेर्ह्रस्वः॥ तनुच्छात्॥ असेर्दीव्यतीति
अक्षद्यूः॥ रेफाच्छ्वोर्लोपः॥ मूर्च्छामोहसमुच्छ्राययोः॥ मूर्च्छतीति मूः॥ मुरौ॥ मुरः॥ धूः॥ धुरौ॥ धुरः॥ डुहः कोघोऽन्ता
देशश्च॥ कामदुघा॥ दृशेष्टक्सकौ चोपमाने कार्य्ये॥ उपमाने कर्म्मण्युपपदे दृशेष्टक्सकौ चात् क्विप्॥ आ सर्वादेः
॥ एषु परेषु सर्वादेरात्वम्॥ अन्यादृशः॥ अन्यादृक्षः॥ अन्यादृक्॥ तादृशः॥ तादृक्षः॥ तादृक्॥ किमिदमः की ईश् दृक् दृ
शदृक्षेषु॥ कीदृशः॥ ईदृशः॥ भवादृशः॥ पादृशः॥ अदसोऽमूः एषु परेषु॥ अमूदृशः॥ मादृशः॥ त्वादृशः॥ अस्मादृशः
॥ युष्मादृशः॥ समानस्य सः॥ सदृशः॥ सदृक्षः॥ सदृक्॥ णिनिरतीते॥ धातोरतीते काले शीले च णिनिः॥ अग्निष्टोमेना
पाक्षीदग्निष्टोमयाजी॥ पितृव्यघाती॥ उष्णभोजी॥ व्रते॥ स्थण्डिलशायी॥ क्विब्रतिङः॥ धातोरतीते काले शीले चेत्॥
ब्रह्महा॥ भ्रूणहा॥ वृत्रहा॥ सुकृत्॥ कर्म्मकृत्॥ पापकृत्॥ अग्निचित्॥ सोमसुत्॥ पञ्च्वा॥ सरसिजम्॥ सरोजम्॥ से

वं०सिं०टी०

स्कारज्न्मा॥प्रजा॥अजः॥द्विजः॥परितः खातापरिखा॥क्तक्तवतू॥धातोरतीते काले एतौ भवतः॥क्तो भावकर्म्मणोः॥स्नात
म्॥हतः॥घटः॥कृतम्॥करम्॥विसृर्द्धि श्वं कृतवान्॥गत्यर्थादिकर्म्मकाच्च कर्त्तरि क्तः भाव कर्म्मणोरपि॥गंगां गतः
देवदत्तेन गङ्गा गता॥स्थितः॥देवदत्तेन स्थितम्॥जमान्तस्पष्टिः॥तिक्से दीर्घः क्तो च॥शान्तः॥दान्तः॥श्लिषशीङ्स्था आ
स वसजनरुहजीर्य्यतिभ्यः कर्त्तरि क्तः॥प्रीतामाश्लिष्टः॥शेषमधिशायितः॥स्वर्गमधिष्ठितः॥हरिमुपासितः॥ह
रिदिनमुपोषितः॥तमनुजातः॥वृषमारूढः॥जगदनुजीर्णः॥क्तो वा सेट्॥उड्पधात्सेट् क्तो वा कित्॥धुनितम्॥
घोतितम्॥प्रमुदितः॥प्रमोदितः॥साधुः॥शीङ्स्विदिमिदिक्ष्विदिधृषिध्वषपूङः स्सेटो क्तक्तवत्त्वकितो न॥अशायिष्टेति॥
शायितः॥शायितवान्॥प्रस्वेदितः॥प्रस्वेदितवान्॥क्ष्वेदितः॥क्ष्वेदितवान्॥मेदितः॥स्वेदितवान्॥मेदितः॥मेदितवान्॥
मर्दितः॥मेदितवान्॥धर्षितः॥धर्षितवान्॥मर्षक्षमान्तो॥मर्षितः॥मर्षितवान्॥पूङो वा कित स्तस्य सेट्॥पवितः॥पूतः॥ राम०
पतितवान्॥पूतवान्॥कितः॥उवर्णान्ताद्वर्णान्तात् श्विश्रिभ्यां च परस्य कितस्तस्य सेटः न॥भूतः॥हुतः॥श्रितः॥श्वयते

स्सम्प्रसारणस्यदीर्घः॥ शूनः॥ वेञोह्रस्वः॥ ऊतम्॥ आदीदितः॥ आदित ईदितश्च क्तक्तवत्वोर्नेट्॥ भितान्तग्वर्त्तमाने॥ पि॥ भि
ताम्वाञ्चनांमतिबुद्धिपूजार्थानाञ्चवर्त्तमाने॥ पिनङ्॥ रदाभ्यनोद श्च॥ दकारान्तपरस्य किनस्तस्यनत्वंदकारस्यच॥ मेदनामि
तिमिन्नम्॥ भावेकर्त्तरिचादितः क्तक्तवत्वोरिड्वा॥ मेदितः॥ मिन्नः॥ प्रस्वेदितः॥ प्रस्विन्नः॥ स्वेदितः॥ छिचरणः॥ अदोजग्धः॥ ता
दौकिति॥ जग्धम्॥ रः॥ रेफात्किनस्तस्यनत्वम्॥ विकीर्णम्॥ जीर्णम्॥ ल्वाद्योदितश्च॥ ल्वादेरोदितश्चधातोः किनस्तस्य
नोभवति॥ लूनः॥ लूनवान्॥ ज्यावयोहानौ॥ जीनः॥ जीनवान्॥ प्यायः पी निकिति॥ पीनः॥ पीनवान्॥ भुजोभुग्नः
॥ हीनः॥ स्वादय ओदितः॥ सूनः॥ सूनवान्॥ ह्लनः॥ उड्डीनः॥ दीनः॥ लीनः॥ रीनः॥ धीनः॥ द्रुवोदीर्घश्च॥ दूनः॥ गूनः॥
क्षियोदीर्घः कर्त्तरिक्तक्तवत्वोर्नत्वञ्च॥ क्षीणः॥ क्षीणवान्॥ कर्त्तरिकिम्॥ क्षितम्॥ पलसंयोगादेरादन्तात्किनस्तस्यन
त्वम्॥ द्राणः॥ ग्लानः॥ म्लानः॥ नुदविदोन्द्राघ्राह्रीनिर्वा भ्योवा॥ त्रातः॥ त्राणः॥ घ्रातः॥ घ्राणः॥ ह्रीतः॥ ह्रीणः॥ नुत्तः॥ नु
न्नः॥ विदविचारणे॥ विन्नः॥ विन्नः॥ उन्दीक्लेदने॥ उत्तः उन्नः॥ निर्वाणोमुनिवह्न्यादौनिर्वातस्तुगते॥ निले॥ दोदत्ति॥

॥दा इत्यस्यदान्किति तेजनु त्थितः॥दत्तः॥दत्तवान्॥स्वान्तोवा॥उपसर्गस्वान्दइत्तरस्यदा इत्यस्यन्तोवाकितिनेननुपितः
॥प्रत्तः॥प्रदत्तः॥अवत्तः॥अवदत्तः॥नाम्यन्तोपसर्गस्यदीर्घोदादेशेतकारे॥सुसु अदापि॥सत्तम्॥नीतम्॥ धात्रोहि॰
किजिते॥निहितः॥ध्मास्त्यापमर्च्छिमदीभ्योननत्वम्॥ध्मातः॥स्त्यातः॥पूर्त्तः॥मूर्त्तः॥मत्तः॥यज॥इष्टम्॥उप्तम्॥कढः॥
व्येञ्॥वीतः॥ह्वेञ्॥हूतः॥उदितः॥उक्तः॥वसतिक्षुधोरिट्त्क्तोक्तवतूनाम्॥उषितः॥क्षुधितः॥सुप्तः॥क्वचिद्दृढः॥क्तक्त
वत्वोर्नेट्॥ओव्रश्चू॥वृक्णः॥अञ्चेःपूजायामिट्॥अञ्चितः॥समक्तः॥जातः॥पचोवःक्तक्तवत्वोस्तस्य॥पक्वः॥
पक्ववान्॥स्फायोमः॥स्फेजैश्वेस्त्ये॥स्फामः॥स्फामवान्॥प्यस्त्यस्य सम्प्रसारणं किति तेन स्यमोवा॥प्रस्तीमः॥प्रस्तीतः॥शु
षेःकः॥शुष्कः॥शुष्कवान्॥स्फायःस्फीतिक्ति॥स्फीतः॥क्षेट्॥क्षीतम्॥गीतम्॥पीतम्॥दो॥दितम्॥सो॥सितम्॥मा॥
मितम्॥सेटोःक्तक्तवत्वोर्णिलोपः॥चोरितः॥चोरितवान्॥याचितः॥ याचितवान्॥ऊर्णोर्नेट्॥ऊर्णुतः॥द्रवस्यकाठिन्येस्य
र्शेवार्थेश्येङःसम्प्रसारणंकितस्तस्यनत्वञ्च॥ननुस्पर्शे॥शी नंच तम्॥स्पर्शेतुशीतञ्जलम्॥अञ्चेःकितस्तस्यन

ए॥म०

त्वन्नावपाहाने॥ समक्रः॥ अन्यत्र। उर ऋमुदकंक्रपात॥ दिवो ॥ विजिगीषायाम्॥ आघूनः॥ विजिगीषायान्नु। घूतम्॥ अनु
पसर्गात्फुल्लक्षीवकृशोल्लाघाः॥ निपात्यन्ते॥ फुल्लः॥ फुल्लवान्॥ क्षीवृ मदे॥ क्षीवः॥ कृश तनुः॥ लाघ शोषणालमर्थयोः
॥ उल्लाघो निरोगः॥ उपसर्गात्तु। वर फलोरल्लउत्तीकित्ति॥ प्रफुल्लः॥ प्रफुल्लितः॥ प्रक्षीबितः॥ प्रकृशितः॥ प्रोल्लाघितः॥ उ
त्फुल्लसंफुल्लौ च॥ वित्तो भोग्यप्रत्यययोः॥ वित्तं धनम्॥ वित्तः पुरुषः॥ अन्यत्र विन्नः॥ भित्तं शकलम्॥ भिन्नमन्यत्॥ ऋ
णमाधमर्ण्ये॥ ऋतमन्यत्॥ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि॥ मन्थमनस्तमःसक्ताविस्पष्टस्वरा
नायासभृशेषु॥ क्षुब्धः॥ मन्थः॥ स्वन शब्दे॥ स्वान्तं मनः॥ ध्वान्तं तमः॥ लग्नं सक्तम्॥ म्लिष्टमविस्पष्टम्॥ रेभृ शब्दे॥ वि
रिब्धं स्वरः॥ फाण्टमनायाससाध्यः॥ कषायविशेषः॥ वाढृ प्रतियत्ने॥ वाढं भृशम्॥ अन्यत्र क्षुभितम्॥ स्वनितम्॥ ध्व
नितम्॥ लगितम्॥ म्लेच्छितम्॥ विरेभितम्॥ फाणितम्॥ वाहितम्॥ धृष्टविशस्ता प्रागल्भ्यविनये॥ धृष्टः॥ विशस्तः॥ अन्य
त्र। धर्षितः॥ विशसितः॥ दृह दृहि वृद्धौ॥ दृढः स्थूलबलयोः॥ दृंहितो दृंहितोऽन्यः॥ दृह दृहि वृद्धौ॥ प्रमोपरिवृढः॥ परिवृ

ढः॥परिवृढः॥परिबृंहितोऽन्यः॥कृच्छ्रगहनयोःकष्टम्॥कष्टोमोहः॥कष्टंशास्त्रम्॥कषितमन्यत्॥घुषिरविशब्दने॥घु-
ष्टोऽविशब्दने॥घुष्टारज्जुः॥अविशब्दनेकिम्॥घुषितंवाक्यम्॥अभ्यर्णमाविदूर्ये॥अभ्यर्दितमन्यत्॥क्षीरहविषोःशृपाकेशृ-
तम्॥अन्यत्तुश्राणम्॥श्रापितम्वा॥दान्तादयोवाणिपाठ्यन्ते॥दान्तः॥दमितः॥शान्तः॥शमितः॥शान्तः॥शमितः॥पूर्णः॥
पूरितः॥दासदानेदास्तः॥दासितः॥स्पष्टः॥स्पाशितः॥छन्नः॥छादितः॥ज्ञप्तः॥ज्ञपितः॥रुष्टः॥रुषितः॥आन्तः॥अमि-
तः॥त्वर्णः॥त्वरितः॥संघुष्टः॥संघुषितः॥आस्वान्तः॥आस्वनितः॥हृषेर्लोमसु॥हृष्टम्॥हृषितम्॥अपचितः॥अपचायि-
तः॥प्यानः॥पीनः॥ह्लादीसुखे॥ह्लादोह्रस्वःकितिते॥प्रह्लन्नः॥प्रह्लादितः॥निनदीभ्यांस्नातेस्सस्यषःकौशले॥निष्णा-
तः॥शास्त्रे॥नद्यांच॥नदीष्णः॥स्येर्ष्यमतिभ्यांस्यांविकरणोऽपिकः॥तथाच॥मुकुन्दस्यासितमित्यादिमिर्द्युपात्तंरमाप-
तेः॥मुकुन्देनदत्तस्यात्तत्त्वशोऽप्यादिरवः॥जीर्य्यतेरतृन्॥जरन्॥जरन्तौ॥क्तमुकावाणौएवेवक्तव्यौ॥धातोस्त्रीनिकालेरग्नौ
भवतः॥तौचयथाक्रमंराणवक्तव्यः॥चकृवान्॥चकृवांसौ॥चकृवः॥चकृवद्भ्याम्॥चक्राणः॥वभज्वान्॥वभज्वांसौ॥व

मज्जुषः॥मेजिवान्॥मेजिवांसौ॥मेजुषः॥जज्ञाग्वान्॥छित्वेसत्येकस्वरादादन्तात्वसे घ्वसोरिग्नान्यस्मात्॥ग
मऽहन्न्विदविशदृशाम्बा॥वभ्रवान्॥भुवोवुक्॥वभ्रुवुषः॥आरिवान्॥आरिवान्॥ददरिद्रिवान्॥वस्पोत्वकृतेतन्निमि
त्तेडभावः॥आदुषः॥ददरिद्रुषः॥जाग्निवान्॥जग्मिवान्॥जगन्वान्॥जाघ्निवान्॥जघन्वान्॥जघुषः॥विविदिवान्॥वि
विद्वान्॥विविशिवान्॥विविश्वान्॥ददृशिवान्॥ददृश्वान्॥ईयिवान्॥सेदिवान्॥ऊषिवान्॥शुश्रुवान्॥प्रातश्शान्मे
तिष्ठेवराक्रियापाम्॥क्रियापांगम्यमानायापाम्बोजेप्रशात्रशानौस्तः॥जेवातिमेवत्॥पचन्नास्ते॥मुग्गानेःतः॥पचमान
ःपठन्ति॥मन्वानोवदति॥कुर्वन्॥कुर्वाणः॥दादेरिः॥पीप्यमानःसोमोभवति॥दीप्यमानमोः॥आसेरनई॥आसेः
परस्मात्तई॥आसीनः॥वाऽदीपोःशतुः॥अवर्णान्ताच्छातुर्नुम्वाईयोः॥तुदत्॥तुदती॥तुदन्ती॥तुदन्ति॥तुदन्तीकु
लेस्त्रीवा॥अप्यपोरान्नित्यम्॥भवन्॥भवन्ती॥भवन्ति॥दीव्यत्॥दीव्यन्ती॥दीव्यन्त्योगंगायमुने॥ददत्॥दधत्॥वि
देर्वावसुः॥वेत्तेःपरस्यशतुर्वावसुरादेशः॥विद्वान्॥विदन्॥माङ्याक्रोशे॥माजीवन्॥लक्षणहेत्वोःक्रियायाम्॥

चं०सिं०कृ०

॥शयानाभुञ्जाते यवनाः॥ अर्ज्जने प्रतीयते॥ अर्ज्जयन्वसति॥ भविष्यति स्यप्रशस्तशानचः॥ करिष्यन्॥ करिष्य
माणः॥ ताच्छील्यवयोवचनशक्तिषु चानश्॥ भोगंभुञ्जानः॥ कवचंबिभ्राणः॥ वचनंविभ्राणः॥ शत्रून्निघ्नानः॥
इङ्धार्य्योः शत्रकृच्छ्रिणि कर्त्तरि शतृ॥ इङ्॥ अधीयन्॥ अकृच्छ्रिणी किम्॥ कृच्छ्रेणाधीते॥ धृञ् धारणे॥ धारयन्॥ द्विष
अमित्रे॥ द्विषः शत्रौ॥ द्वेष्टीति द्विषन्॥ अर्ह पूजायाम्॥ अर्हन्॥ शीलेतृन्॥ कटंकर्त्ता॥ ईसुस्नुकु शीले॥ अलंकरि
ष्णुः॥ निराकरिष्णुः॥ प्रजनिष्णुः॥ जिभुवोर्न्निष्णुग्गोस्नो॥ जिष्णुः॥ भूष्णुः॥ भविष्णुः॥ ग्लास्नुः॥ त्रास्नुः॥ गृधु अभिकांक्षायाम्॥ गृध्नुः॥ ञिधृषा प्रागल्भ्ये॥ धृष्णुः॥ क्षिप प्रेरणे॥ क्षिप्नुः॥ आकोकरणः॥ शीलेर्थे षाक उकञ् र इत्येते
प्रत्ययाः॥ जपजल्पव्यक्तायां वाचि॥ जपाकः॥ जल्पाकः॥ कुट्ट छेदने॥ कुट्टाकः॥ लुण्ठ चौर्य्ये॥ लुण्टाकः॥ वृङ् संभ
क्तौ॥ वराकः॥ भिक्ष याञ्चायां प्राप्तावप्राप्तौ च॥ भिक्षाकः॥ भिक्षुः॥ शंसु हिंसास्तुत्योः॥ आशंसुः॥ चिकीर्षुः॥
लाषुकः॥ पाडुकः॥ पातुकः॥ स्थायुकः॥ भावुकः॥ वृषु सेचने॥ वर्षुकः॥ घातुकः॥ कामुकः॥ गामुकः॥ शामुकः॥

राम०

॥दामुकः॥ दामुकः॥ शॄवन्द्योरारुः॥ शॄ हिंसायाम्॥ शारुः॥ वदि॥ वन्दारुः॥ स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाशी
ङ्भ्यः आलुः॥ स्पृहयालुः॥ गृह ग्रहणे॥ गृहयालुः॥ पतयालुः॥ दय दाने॥ दयालुः॥ द्राकुत्सायाम्॥ निद्रालुः॥ तदो नान्त
त्वम्॥ तन्द्रालुः॥ श्रद्धालुः॥ शयालुः॥ शमित्यष्टाभ्यो घिनुण्॥ शमी॥ दमी॥ तमी॥ भ्रमी॥ क्लमी॥ क्षमी॥ प्रमादी॥ चजोः
कगौ विति॥ चकारजकारयोः ककारगकारौ भवतः घिति॥ पृची संपर्चने॥ संपर्की॥ सृज विसर्गे॥ संसर्गी॥ युज समाधौ
योगी॥ विचिर् पृथग्भावे॥ विवेकी॥ त्यागी॥ रञ्ज रागे॥ असिञसिमके अने घिनुणि च रञ्जेर्नलोपो वाच्यः॥ रागी॥ भागी
॥कष हिंसायाम्॥ विकाषी॥ लस श्लेषणक्रीडनयोः॥ विलासी॥ प्रसारी॥ मिथे हिंसायाम्॥ प्रमाथी॥ प्रवासी॥ नि
न्दादेर्वुञ्॥ णिदि कुत्सायाम्॥ निन्दकः॥ हिंसि॥ हिंसकः॥ परिक्षेपकः॥ परिवादकः॥ चलनशब्दार्थादकर्मकाद्युः॥
चलनः॥ अकर्मकात् किम्॥ पठिता विद्याम्॥ चुप मन्दायां गतौ॥ चोपनः॥ कपि किञ्चिच्चलने॥ कम्पनः॥ शब्द शब्द
क्रियायाम्॥ शब्दनः॥ रवणः॥ अनुदात्तेतो हलादेरकर्मकाच्च॥ वर्त्तनः॥ वर्द्धनः॥ रमणः॥ ज्वारेश्च॥ जु गतौ वे

वं० सिं० कृ०

गेच॥ जवनः॥ सरणः॥ क्रमगिगतौ॥ क्रमनः॥ गर्द्धनः॥ क्रोधनः॥ रोषणः॥ मडिभूषायां गतौ च॥ मण्डनः॥ भूष अलं
कारे॥ भूषणः॥ ज्यादेरिनिः॥ जयी॥ प्रजवी॥ दरी॥ क्षयी॥ दादेरुः॥ दारुः॥ धारुः॥ शिञ्॥ सेरुः॥ सृघस्यदः क्मरः॥ सृमरः
॥ घस्मरः॥ अद्मरः॥ भञ्जभासमिदो घुरः॥ भङ्गुरः॥ भासुरः॥ मेदुरः॥ विदिभिदिछिदेः कुरः॥ विदुरः॥ भिदुरः॥ छिदुरः॥ इण
नशजिसर्तिभ्यः क्वरप्॥ इत्वरः॥ इत्वरी॥ नश्वरः॥ नश्वरी॥ जित्वरः॥ सृत्वरः॥ गमो मलोपश्च॥ गत्वरी॥ जागर्तेरूकः॥
जागरूकः॥ पडूकः॥ यजजपदंशवदेभ्यो यङन्तेभ्य ऊकः शीले॥ लुक॥ ऊके सति यङो लुक्॥ पायजूकः॥ जञ्जपूकः
॥ दन्दशूकः॥ वावदूकः॥ भियः क्रुक्लुकनौ॥ भीरुः॥ भीरुकः॥ भीलुकः॥ नमादेरः॥ नम्रः॥ स्मेरः॥ नञ्पूर्वो जसिः क्रियासात
त्ये वर्तने॥ जसु मोक्षणे॥ अजस्रम्॥ कम्रः॥ हिंस्रः॥ दीपी दीप्तौ॥ दीप्रः॥ विन्दु इच्छु एतौ निपात्यौ॥ वेत्तेर्नुम् च्छीलः॥ विन्दुः॥ राम०
इच्छतिः इच्छुः॥ स्वापितृषिधृषिभ्यो नानिङ्॥ स्वप्नक्॥ स्वप्नग्॥ स्वप्नजौ॥ तृष्णक्॥ धृष्णक्॥ स्थादेर्वरः॥ स्थावरः॥ ईश्वरः॥
भास्वरः॥ पिश गतौ॥ पेश्वरः॥ कस गतिशासनयोः॥ कस्वरः॥ आदृतः किर्द्दिश्च भूते॥ आदत्ताद्दनोऽज्जानिग्गमिमनिम्यः

सासहिवावहिचाचलिपापभितम्यश्चकिः यत्यपो भवति म्रेतेशीले ग्रंथे घातोर्भ्वद्भित्वम्॥ कीर्लिद्वद्वाच्यः॥ रामस्सोमंपायिर्ष्य
ज्ञेद द्विर्गश्च किरसुतम्॥ पाजकान्नवाव्रिराः॥ नाह्निः पौराङरी के म हा द्विजान्॥ १॥ जाग्निः॥ मेनिः॥ जामिः॥ सासहिः॥ वावदिः
॥ चाचलिः॥ पापतिः॥ अष्योरादयः॥ कादेरुरा॥ करोतीति कारुः॥ वातीति वायुः॥ आतो पकु॥ पायुः॥ जिजये॥ जायुः॥ मिनो
तीति मायुः॥ स्वद आस्वादने॥ स्वादुः॥ साधुः॥ आशुः॥ जनादेर्नुरण्॥ जानु॥ दारु॥ सानुः॥ चारु॥ चाटु॥ किञ्जस्योः श्रिराः॥ किं प्र
णातीभिति किंशारुः॥ जरु मैत्रि जरायुः॥ ञोरस्यलश्च॥ तरन्त्यनेन वर्णा इति तालु॥ कृ के वचः कश्च॥ कृकेन गलेन वक्तीति कृ
कवाकुः॥ भ्रादेरुः॥ प्रियन्ते अस्मिन्निति मरुः॥ महुः॥ शपुः॥ तरुः॥ वरुः॥ त्सर छद्मगतो॥ त्सरुः॥ तनुः॥ मपुः॥ धन रवे॥ धनुः
॥ अण शब्दे॥ अणुः॥ कटुः॥ वट वेष्टने॥ वटुः॥ शृणातीति शरुः॥ स्वरुः॥ त्रपु॥ असुः॥ वसुः॥ हनुः॥ वम्ब वम्बने॥ वम्बुः॥ मन
ज्ञाने॥ मनुः॥ मसुः॥ विदि अवयवे॥ विन्दुः॥ स्यन्देस्सम्प्रसारणं धश्च॥ सिन्धुः॥ उन्देरादेरिच्च॥ उनत्तीति॥ इन्दुः॥ स्कन्दे
स्सलोपश्च॥ कन्दुः॥ सृजेरसुम् सलोपश्च॥ रज्जुः॥ फलेर्गुक्॥ फल्गुः॥ पाटेश्यटिः॥ पाटयतीति पटुः॥ मनेर्धः॥ मधु॥ ज

वं॰सि॰कृ॰

नेरुः ॥ जायतेऽइति जतु ॥ वलेर्गुक् ॥ वल्गु ॥ नमेर्नाकिः ॥ नम्यतेऽनेनेति नाकुः ॥ श्यतेः कस्सवच्च ॥ शिशुः ॥ याप्रोर्द्वे च ॥ प
पुः ॥ वभ्रुः ॥ चात् अन्यतोपि चक्रुः कर्त्ता ॥ जघ्नुर्हन्ता ॥ पपुः पालकः ॥ व्यधेः कुः ॥ विधुः ॥ कृग्रोरुरच्च ॥ कुरुः ॥ गुरुः ॥ रपेरसेत्
॥ रपवक्ता पापवाचि ॥ अनिस्संपतीति रिपुः ॥ अर्जिदृशिकम्यमिपशिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च ॥ अ
र्जेर्ऋज्जेने ॥ अर्जीयातिरुणानद इति ऋजु ॥ सर्वान् विशेषेण पश्यतीति पशुः ॥ कम्बुः ॥ अमरोगे ॥ अम्बुः ॥ पांशि गमि शा
सनयोः ॥ पांशुः ॥ बाधते इति बाहुः ॥ पाधि मादि भ्रज्जां सम्प्रसारणं सलोपश्च ॥ दृशुः ॥ मधुः ॥ न्यंक्वादेर्गुः ॥ न्यङ्कुः ॥ भ्रज्ज
तितपसा भृगुः ॥ लंघिबंह्योर्नलोपश्च ॥ लघुः ॥ बाल मूल लघ्वलमङ्गुलीनां बालस्यरः ॥ रघुः ॥ बहुः ऊरोर्णोतेर्नुलोपश्च ॥ ऊ
रुः ॥ महति ह्रस्वश्च ॥ उरु महत् ॥ आङ्परयोः खनिशृभ्यां डिच्च ॥ आखनतीति आखुः ॥ शॄ हिंसायाम् ॥ परं शृणातीति प
रशुः पृषोदरादित्वात् अकारलोपात् पर्शुरपि ॥ ह्रोश्च ॥ द्रवतः हुमिति द्रुः ॥ प्रातधाइवतीति प्रातद्रुः ॥ मृगय्वादयो निपात्याः
॥ मृगं यातीति मृगयुः ॥ मङ्कुः ॥ नीलङ्गुः ॥ मन्धादेरुरः ॥ मन्दुरा ॥ मथेर्हिंसायाम् ॥ मथुरा ॥ चते च देप्याचने च ॥ चतुरः

राम॰

॥ चदुरः॥ अङ्कुरः॥ मकुरादयो निपात्याः॥ मा घतीति मकुरः॥ कर्बुरो॥ कर्वुरः॥ वन्धुरः॥ बम्भूरः॥ कुकृस्कु अदने॥ कुकु
रः॥ कुक्कुरः॥ हक्कुरः॥ टकुरः॥ अस्यतिक्षिपतिर्देवानिति। असुरः॥ मसूरः॥ मसुरः॥ शावश्वोराङ्गौ॥ श्रुइति आश्वर्य्ये॥
श्वशुरः॥ अविमह्योरिषटः॥ अविषः॥ महिषः॥ अमे र्दीर्घश्च॥ आमिषम्॥ रुहेर्वृद्धिश्च॥ रौहिषः॥ किलेर्वुकुच॥ किल
शोल्के॥ किल्बिषम्॥ मद्यादेः किरः॥ मादिरा॥ खादिरः॥ मन्दिरम्॥ तिम आर्द्रीभावे॥ तिमिरम्॥ मिहिरः॥ छिद्रिरः॥ रुचिर
म्॥ रुधिरम्॥ वन्धवन्धने॥ वधिरः॥ शुषिरम्॥ अजिरादयो निपात्याः॥ आजिरम्॥ शाशप्लुतगतौ॥ शाशतीति शिशिर
म्॥ श्रथमोचने॥ श्रथातीति शिथिलम्॥ स्थिरम्॥ स्फायी॥ स्फिरम्॥ स्थविरः॥ खदस्थैर्य्ये हिंसायां च॥ खदिरः॥ शीङ्
शिविरम्॥ सलगतौ॥ शलइतिशालिलम्॥ अनगतौ प्राणने च॥ अनिलः॥ मात्हऊसाहे॥ महिला॥ कोकिलः॥ कुटिलः॥
कम्॥ कपिलः॥ मथ्यन्ते पिबोचा मिथिला॥ कुवेरादयोऽपि॥ कुवि आच्छादने॥ कुवेरः॥ कहवरणे॥ कपोतः॥ भाने ईव
तुः॥ भातीति भवान्॥ किशोरादयः॥ किं प्रणातीति किशोरः॥ कठ कृच्छ्रजीवने॥ कठोरः॥ चकतृप्तौ॥ चकोरः॥ कम्पते इ
ति कपोलः॥ पटोलः॥ मिनातेरूरः॥ मिनातीति मयूरः॥ स्यन्देः सम्प्रसारणं च॥ सिन्दूरः॥ स्याहेस्तुः॥ सिनोतीति सेतुः॥ त

नुः॥ समीमसीपरिणामे॥ सन्तुः॥ मस्तु॥ धातुः॥ षचसमवाये॥ सक्तुः॥ दातुः॥ क्रोष्टा॥ अर्त्तेस्तुट्॥ ऋच्छतीतिऋतुः॥॥ म
न्तुः॥ जन्तुः॥ चापः कि॥ केतुः॥ वस्तु॥ आग्नारीरीत॥ वास्तुः॥ कृञः कतुः॥ क्रतुः॥ जीवेरातृन्कोरद्विश्च॥ जैवातृकः॥
॥ कृषादेरूः॥ कर्षूः॥ खर्जेर्व्यथने॥ खर्जूः॥ वहोधश्च॥ वधूः॥ कषेश्छश्चकच्छूः॥ कासाहृ्योनिपात्याः॥ कासूः
॥ पाहूः॥ लविसंस्थयणो॥ अलाबूः॥ कफेलूः॥ हरिद्रादृढूः अन्धादयः॥ अन्धूः॥ जनेर्वुक्॥ जम्बूः॥ कर्कन्ध्वातीतिक
र्कन्धूः॥ दिधिष्वेर्ध्यस्यतीतिदिधिषूः॥ स्फायोरुतिः॥ मरुत्॥ गरुत्॥ गिरतेरुतिरत्नस्यमुट्॥ गर्मुत्॥ चटेरुलः॥ चटुल
म्॥ ह्वारेरितिः॥ हरितः॥ रोहितः॥ युषइतिसोजोध्वातुः॥ युषभञ्जने॥ योषित्॥ नाडेर्जिलुक्च॥ नडित्॥ शमेरठः॥
शरठः॥ कमाहेरठः॥ कमठः॥ जरठः॥ रमेर्हिङ्किः॥ रमतेश्शतिरामठम्॥ शमेखः॥ शंखः॥ करोष्टः॥ करटः॥ कृषलादयः
कलप्रत्ययान्तानिपात्याः॥ वृषलः॥ शाशाशावलः॥ पलगतौ॥ पललम्॥ सरलम्॥ तरलः॥ कम॥ कम्बलः॥ मुसखणे
ने॥ मुसलम्॥ लगिगतौ॥ लङ्गेर्वृद्धिश्च॥ लाङ्गूलम्॥ कुम्पलः॥ कुद्मलः॥ कश्मलम्॥ कोमलम्॥ मञ्जुमलम्॥ मज
॥ मलम्॥ चुपमन्दायांगतौ॥ चपलम्॥ शाकलम्॥ शमलम्॥ छो॥ छगलः॥ अमान्ताड्डः॥ दण्डः॥ खण्डः॥ रण्डः॥ कव

र्गो॥ हिम्यः किच्च मुडू॥ गत्तौ॥ मुडः॥ स्यादेरालः॥ स्यालम्॥ स्याली॥ पतिचण्डिभ्यामालञ्॥ पात्तालम्॥ चण्डिकोपे॥ चण्डा-
लः॥ तमादिभ्यः कालः॥ तमालः॥ विशालः॥ विडभेदने॥ विडालः॥ मृणामुखे॥ मृणालम्॥ कुलसंस्त्यानेनाशानायाञ्च॥
कुलालः॥ कपालम्॥ पलालम्॥ पत्तादिभ्यो ङ्गः॥ पतङ्गः॥ तरङ्गः॥ लवङ्गः॥ विडादिभ्यः कित्॥ विडङ्गः॥ मृदृ सोदने॥
मृदङ्गः॥ गमादेर्गः॥ गङ्गा॥ छो छेदने॥ छागः॥ छागी॥ खडभेदने॥ खड्गः॥ मङ्गादयोपि निपात्याः॥ मज्जा॥ मङ्गः॥ मृ-
ङ्गम्॥ भृङ्गा॥ शार्ङ्गः॥ पूगः॥ मुञ्जः॥ शरदादयो दिश्यन्त्यपान्ता निपात्याः॥ मृगणातीति शरत्॥ हरणातेः॥ दरत्॥ दृषत्॥ त्य-
जेः॥ त्यजेरादिश्चात्यपः लोपश्च॥ त्यद्॥ तद्॥ यजेः॥ यद्॥ इणः॥ एतद्॥ भियः॥ जिःश्रुक हस्वश्च॥ भिषक्॥ पुष्यादिभ्यो-
म दिक्॥ पुषस्सोत्वः॥ युष्मद्॥ अस्मद्॥ त्वम्॥ अहम्॥ स्तुवाहेर्मः॥ स्तोमः॥ सोमः॥ होमः॥ धर्म्मः॥ सेमम्॥ मादीनो
॥ मामः॥ यामः॥ वामः॥ पद्मः॥ नेमः॥ जिह्मादयः॥ हाकः॥ जिह्म॥ यामः॥ सिमः॥ शुष्मम्॥ श्यामः॥ धूमः॥ युग्मम्॥
रुक्मम्॥ तिग्मम्॥ हनः॥ हिमम्॥ भीमः॥ भीष्मः॥ घस्मरादयो॥ घृणातीति घर्म्मः॥ ग्रसेः॥ ग्रीष्मः॥ ग्रघेः षिवसं

प्रसारणम्॥ पृथिवी॥ प्लुतिः॥ अशादेः क्वन्॥ अश्वः॥ खट् कांक्षायाम्॥ खट्वा॥ विश्वम्॥ सर्वादिरयम्॥ स्त्वादेर्वः॥ स्तनम
नेन विश्वमिति सर्वे॥ गर्हे॥ शार्हे॥ ग्रीवादयः॥ ग्रीवा॥ लिहन्त्यनया सा जिह्वा॥ घादेः कन्॥ युवा॥ वृषु सेचने॥ वृ
षा॥ तक्षा॥ राजा॥ धन्वा॥ प्रातिदिवा॥ सप्यशूभ्यां तुट्॥ सप्त॥ अष्टा॥ नञि जहातेः॥ अहः॥ श्वादयः॥ श्वयतिरि
ति श्वा॥ उक्ष सेचने॥ उक्षा॥ पूष वृद्धौ॥ पूषा॥ प्लिह गतौ॥ स्निह्यते इति प्लीहा॥ मुह्यन्त्यस्मिन्नाहते मूर्द्धा॥ मज्जति
अस्थिषु मज्जा॥ अर्यमा पूर्वो माङ्॥ अर्यमा॥ मातर्यन्तरिक्षे श्वयतीति मातरिश्वा॥ महतेः पूजायाम्॥ मघवा॥ कृहृ
भ्यामेणुः॥ करेणुः॥ हरेणुः॥ कुषादेः क्थन्॥ कुष्ठम्॥ रथः॥ काशृ दीप्तौ॥ काष्ठम्॥ अवे भृञः क्थन्॥ अवभृथः॥ उपादेः स्थः॥
ओष्ठः॥ कोष्ठम्॥ गाथा॥ अर्थः॥ पथु गतौ॥ शोथः॥ सर्त्तेर्णित्॥ सार्थः॥ निशीथादयः॥ निशीथः॥ तीर्थम्॥ रिचिर् विरेचने॥ राम०
रिक्थम्॥ षिव स्मरणे॥ सिक्थम्॥ पृषु सेचने॥ पृष्ठम्॥ गूथम्॥ यूथम्॥ पुड गतौ॥ प्रोथः॥ स्फायादेः रक्॥ स्फारम्॥ तञ्चु संको
चने॥ तक्रम्॥ वञ्चु गतौ॥ वक्रम्॥ चञ्चु गतौ॥ चक्रम्॥ शक्रः॥ क्षिप्रम्॥ क्षुद्रः॥ चदि आह्लादने दीप्तौ च॥ चन्द्रः॥ उन्दी॥ उद्रः॥

श्विता॥ श्वित्रम्॥ हत्रः॥ वीरः॥ नीरम्॥ छिद्रम्॥ उस्रा॥ शुभ्रम्॥ अमितम्योर्दीर्घश्च॥ आम्रम्॥ ताम्रम्॥ निन्द्रादयोऽपि॥ निदि॥
निन्द्रा॥ अर्द गतौ याचने च॥ आर्द्रम्॥ शुच॥ शूद्रः॥ दुःखेनेपजे इति हूरम्॥ कृती॥ कृच्छ्रम्॥ क्रूरः॥ रोदयतीति रुद्रः॥ जीरः॥ स्वादेः
कः॥ सुरः॥ स्तरः॥ धीरः॥ गृध्रः॥ शुःस्यैत्रः अभिभवार्थः॥ स्फूर्यादयः॥ शरुः॥ सि॥ सीरम्॥ किशोरम्॥ चीरम्॥ विधे॥ विध्रम्॥ ह
धु॥ वध्रुम्॥ वध्रः॥ उन्द्रः॥ आणि गतौ॥ अभ्रम्॥ वज्रः॥ टुवेपृ कम्पने॥ विप्रः॥ उच समवाये॥ उग्रः॥ भिभी॥ भेरी॥ शुच शोके॥ शु
कः॥ शुक्रः॥ गुङ् गतौ॥ गौरः॥ इरा॥ इरा॥ मा माने॥ माला॥ शिल्पिसंज्ञयोः कुन्॥ रजकः॥ चष भक्षणे॥ चषकम्॥ कुह विस्मा
पपने॥ कुहकम्॥ हतकम्॥ मुषेर्दीर्घश्च॥ मूषकः॥ क्षिपरकः॥ क्षिपकः॥ श्यास्त्याहृञ्आदिभ्य इनः॥ श्यैङ् गतौ॥ श्येनः॥ स्त्ये
नः॥ हरिणः॥ वृजादेः कित्॥ वृजिनम्॥ अजेर्वीन॥ अजिनम्॥ केविनम्॥ नलिनम्॥ कुणिनम्॥ दोहिनम्॥ द्रविणम्॥ दक्षचा
तुर्ये॥ दक्षिणः॥ दक्षिणा॥ दक्षिणा॥ अर्तेः किदिरच्च॥ इरिणम्॥ वेपितुह्योर्ह्रस्वश्च॥ विपिनम्॥ तुहिनम्॥ तलिपुलिभ्या
म्वा॥ तालिनम्॥ जलप्रतिष्ठायाम्॥ पुल संस्थाने॥ पुलिनम्॥ रुहेः॥ रोहिणः॥ आप्नोतेः क्विप् ह्रस्वश्च॥ आपः॥ अपः॥ अद्भिः॥

चं॰सिं॰कौ॰

अम्बः ॥ ग्लानुदिभ्यां डौः ॥ ग्लौः ॥ नौः ॥ रातेर्डैः ॥ राः ॥ रायौ ॥ गमेर्डोः ॥ गौः ॥ बाहुलकाद्द्युतेरपि डोः ॥ द्यौः स्त्री स्वर्गान्तरिक्षयोः ॥ ॥ भ्रमे
र्डूः ॥ भ्रमतीति भ्रूः ॥ दमेर्डोसिः ॥ दाम्यतीति दोः ॥ दोषौ ॥ पणेरिज आदेश्च वः ॥ वणिक् ॥ अशेरशादेशो पुट् प्रत्ययः ॥ रशना ॥ उन्दे
र्नलोपश्च ॥ ओदनः ॥ गमेर्गश्चादेशश्च ॥ गगनम् ॥ अम्पेभ्योऽपि पुः ॥ स्यन्दनम् ॥ रोचना ॥ रञ्जि कृभ्यां क्युः ॥ रजनम् ॥ कृ ॥ कि
रणः ॥ धृषेर्धिष च ॥ धिषणा ॥ धाञश्च ॥ निधनम् ॥ एमदादयः ॥ एधसेचने ॥ एधन्तिः ॥ वृहत् ॥ महान् ॥ जगत् ॥ विपूर्वे हन् ॥
वेहत् ॥ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तृ भ्रातृ जामातृ मातृ पितृ दुहितृ एते निपात्यन्ते तृन्तृच्प्रत्ययान्ताः ॥ न पतन्त्यनेनेति न
प्ता ॥ नेष्टा ॥ त्वेषतीति त्वष्टा ॥ क्षदमक्षरो ॥ क्षत्ता ॥ जुहोतीति होता ॥ पोता ॥ प्रशास्ता ॥ भ्राज ॥ भ्राता ॥ जायां मातीति जामाता ॥
मिमीते इति माता ॥ पातीति पिता ॥ दोग्धीति दुहिता ॥ सावसेर्कः ॥ स्वसा ॥ यतेर्वृद्धिश्च ॥ याता ॥ नञि नन्देश्च ॥ ननन्दतीति नना
न्दा ॥ ननन्देत्येके ॥ दिवेर्ऋः ॥ देवा ॥ देवरौ ॥ नयतेर्डिच् ॥ ना ॥ नरौ ॥ अर्त्यादेरनिः ॥ अरणिः ॥ सरणिः ॥ धरणिः ॥ धमनिः ॥ अशनिः
॥ अवनिः ॥ तरणिः ॥ रजनिः ॥ अर्च्चादेरिस् ॥ अर्च्चिः ॥ रोचिः ॥ शोचिः ॥ हविः ॥ सर्विः ॥ छर्दिः ॥ सार्थिः ॥ द्युतेरादेर्जः ॥ ज्योतिः ॥ जना

राम॰

देरुस्णाजत्नुः॥ घनुः॥ चसोश्चित्च्च॥ चस्नुः॥ परुः॥ वपुः॥ पक्नुः॥ एजेरीर्णित्॥ एनीत्याद्युः॥ धीवरादयः॥ ष्वरब्रात्यपान्नाः॥ धीव
रः॥ धीवरी॥ शर्वरी॥ निषद्वरः॥ हषद्वरः॥ पीवरः॥ इणादेर्नक्॥ इनः॥ जिनः॥ दीनः॥ कुस्मः॥ वम्बेर्ड्डघवुधौच॥ ब्रघ्नः॥ बुध्नः
धादेर्नः॥ धानाः॥ पृपूर्णे॥ पर्णम्॥ वस्नः॥ अश्नोरशः॥ लसेर्नस्याप्टमटौ॥ लस्नम्॥ लक्ष्मणः॥ रास्नादयः॥ रास्ना॥ सा
स्ना॥ स्थूणा॥ वीणा॥ कृत्ती॥ कृत्स्नम्॥ तिम्नः॥ तीक्ष्णम्॥ श्लिष॥ श्लक्ष्णम्॥ मनादेर्युः॥ मन्युः॥ हस्युः॥ जन्युः॥ मङ्स्युक्॥
मृत्युः॥ सर्वरपुः॥ सरपुः॥ सरयुः॥ पादेर्ध्यः॥ पापम्॥ म्पादेः किन्त॥ नीपः॥ स्तूपः॥ कूपः॥ कुशब्दे स्पदीर्घो निपात्यते॥ कुवानीम
ण्ड काअस्मिन्निति कूपः॥ शिल्पादयः॥ शील॥ शिल्पम्॥ शासुः॥ शष्पम्॥ वाष्प॥ वाष्पम्॥ रु॥ रूपम्॥ सृ॥ सर्पम्॥ स्तनादे
र्त्नादित्नुः॥ स्तनयित्नुः॥ गदयित्नुः॥ दाभाभ्यांनुः॥ दानुः॥ भानुः॥ धेटइच्च॥ धेनुः॥ पुवः किन्त॥ स्तनुः॥ स्थाशीभ्यांणुः॥ स्था
णुः॥ रेणुः॥ विषेः किन्त॥ विष्णुः॥ कादेः कः॥ कर्कः॥ राका॥ अर्कः॥ अलविसंत्रपरणे॥ अल्कः॥ कल्कः॥ इण॥ एकः॥ भेकः॥
भेकी॥ काकः॥ पाकः॥ हाक॥ निहाका॥ नौसदेर्डित्॥ निष्कः॥ शकेरुनडन्तिउन्तउनिप्रत्ययाः॥ शकुनः॥ शकुन्तिः॥ शकु

नः॥ शकुनिः॥ हृषपाभ्यामितः॥ हरितः॥ श्येतः॥ रुहेरस्य लो वा॥ रोहितः॥ लोहितम्॥ श्वादेराप्य॥ श्रवाप्यः॥ स्पृहयाय्यः॥ वृञ
एन्यः॥ वरेण्यः॥ अर्त्तेरन्यः॥ अरण्यम्॥ षकुसेवने॥ षस्पजः॥ पर्ज्जन्यः॥ वदेरान्यः॥ वदान्यस्त्यागीवाग्मिनोः॥ अमादेरत्रः॥ अ
मत्रम्भाजनम्॥ नक्षमतौ॥ नक्षत्रम्॥ पतॢपतने॥ पतन्तीति पतत्रं तनूरुहम्॥ गडेरादेश्च कः॥ कडत्रम्॥ उलपोरेकत्वसमरणा
त्॥ कलत्रम्॥ वस्त्रम्॥ आदेरतः॥ विभर्त्तीति भरतः॥ पर्वपूरणे॥ पर्वतः॥ एषिरञ्जिभ्यां कित्॥ एषतः॥ रजतं रौप्यम्॥ शपा
देरथः॥ शपथः॥ रमथः॥ शमथः॥ आवसथः॥ सम्वसथः॥ रभादेरसः॥ रभसो वेगहर्षयोः॥ वेञ आतो मावत्तु॥ वे
तसः॥ दिवश्च कित्॥ दिवसः॥ काद्देरभः॥ काकरभः॥ शृशारभः॥ शलमतौ॥ शलभः॥ कलभः॥ गर्द्दभः॥ ऋषिवृषिभ्यां कित्
॥ ऋषभः॥ वृषभः॥ रासभः॥ वल्ल आच्छादने॥ वल्लभः॥ विशादेरन्तः॥ वेशन्तः॥ दशन्तः॥ जयन्तः॥ हन्तेर्हि मुट् च॥ हेमन्तः॥ अ रामः॰
र्त्यादेररः॥ अररः॥ अररम्॥ भ्रमरः॥ चमरः॥ देवरः॥ वासरः॥ कुवः क्रस्व॥ कुरः॥ अङ्ग्यादेरारः॥ आङ्गारः॥ मन्दारः॥ ग
डेश्च कडः॥ कडारः॥ शृङ्गारादयः॥ शृङ्गारः॥ भृङ्गारः॥ मजा॥ मार्ज्जारः॥ कमा॥ कमादेरारः कित्॥ कर्मेरुयथायथा॥

॥कुमारः॥तुषारः॥कासारः॥सर्त्तेरपः छुक च॥सर्षपः॥विटपादयः॥विट्शब्दे॥विंद्योश्चस्यः॥विष्या॥विष्टपम॥भुवनम्
॥कृण शब्दे॥कुणपम्॥बल संवरणे॥उलपम्॥कृतादेस्तिकः॥वर्त्तिका॥कृतः किन्॥कृत्तिका॥इष्यशिभ्यां तकः॥इ
ष्टका॥अष्टका॥वीपतिभ्यां तनः॥वेतनः॥पत गतौ॥पत्तनम्॥अर्त्त्यादेर्भः॥अर्भः॥दृ॥दर्भः॥गर्भः॥इणः किन्॥इभः॥असिस
ञ्जिभ्यां क्थिः॥अस्थि॥सक्थि॥शुषादेः क्सिः॥शुक्सिः॥कुक्षिः॥अश उ॥अक्षि॥इषेः क्सुः॥इक्षुः॥अवितृस्तृतन्त्रिभ्य ईः॥
अवीः॥तरीः॥स्तरीः॥धूमः॥तन्त्रीः॥लक्षेर्मुट् च॥लक्ष्मीः॥वातप्रम्यादयः॥वातप्रमीः॥ययीः॥पपीः॥रत्न्यादयः॥राल्लिः॥अ
ञ्ज॥अञ्जिष्टोभानुः॥मही॥मत्स्यः॥अत॥अतिथिः॥अगि॥अङ्गुलिः॥कु॥कवसः॥कोनेरच इत्येके॥कवचम्॥पु॥पवासः॥
कृश॥कृशानुः॥शृ करः॥शर्करा॥पुषः कित्॥पुष्करम्॥गमेरिनिर्भविष्यति॥गमी॥परमेस्थः कित्॥परमेष्ठी॥मन्थ इनिः कि
त्॥मन्थाः॥मन्थाने॥पतस्थ च॥पन्थाः॥पन्थाने॥वलाकादय॥वलाकापताका॥खजमन्थे॥खजाका॥पा॥पाने रित्वन्तुम
व॥पिनाकः॥तड आघाते॥तडाकः॥दृषेरीकः॥दृषीका॥अनिहृषिभ्यां कित्॥अनीकम्॥हृषीकम्॥अलीकादयः॥अलम्भूषण

दौ ॥ अलीकाप्रियम् ॥ विपूर्वात् व्यलीकं विप्रियं खेदश्च ॥ पुंड्कर्म्मशीर्षमे ॥ पुण्डरीकम् ॥ इषीकास्तूलिका ॥ काटेरीषः ॥ कि ॥ करी
षोऽस्त्री शुष्कगोमये ॥ तरीषः ॥ ग्रादेः कीषः ॥ ग्रापोहरः ॥ पुरीषम् ॥ शिरीषः ॥ अर्जेर्ऋजिः ॥ ऋजीषम् ॥ अविशादेः ॥ प्रत्ययस्य
अरुडागमो निपात्यते ॥ अम्बरीषः ॥ कौटेरीरः ॥ कटीरः ॥ शरीरम् ॥ गम्भीरादयः ॥ गमेर्भः पर्से नुम् च ॥ गभीरः ॥ गम्भी
रः ॥ वश्चा ॥ उशीरम् ॥ घस्ल ॥ घसेरीर किन्त्वागमांस्वरे ॥ क्षीरम् ॥ शीङो धुक्लक्वलञ्वालञ्वाल्नपालः ॥ शीधु ॥ शीलम् ॥ शैवलः
॥ शैवालः ॥ शेवालम् ॥ शेपालम् ॥ उल्कादयः ॥ उलूकः पाक्षिविशेषः ॥ उत्पलमुलञ्च ॥ शम्ब ॥ शम्बूकः ॥ शल्य ॥ शल्कम् ॥
माडिभूषापाम ॥ मण्डूकः ॥ नियोमिः नेमि ॥ अर्त्तेरूरच ॥ घोर्विह्रसे ॥ ऊर्मिः ॥ भुवः कित् ॥ भूमिः ॥ अश्नोतेरश्च ॥ रश्मिः ॥ स्वादे
र्मिः कित् ॥ स्थाणीरंकुशः ॥ हामिः स्मात्रियमे घयोः ॥ अंगेर्नलोप ॥ अग्निः ॥ वहादेर्निः ॥ वह्निः ॥ श्रोणीः ॥ योनिः ॥ श्रोणी रुकाम्बु एम०
वाहिनी ॥ ग्लानिः ॥ घृण्यादयः घृणिः किरणः ॥ स्पृशतेः सलोपः ॥ पृश्निरल्पशरीरः ॥ पृषेर्हिः ॥ पार्ष्णिः पादतलम् ॥ पातेर्डतिः
॥ पतिः ॥ शकेर्ऋतन् ॥ शकृत् ॥ हन्तेर्ऋतिः हद्व ॥ हन्तेर्ऋतिः स्याद् हस्य हादेशश्च धातोः हान्ति दुरितमनया अंहतिः ॥ शोरेः मडादेः

क्रिः॥ स्तीः॥ भूरिश्रवुरम्॥ अद्रा॥ अद्रिः॥ शदेर्लिः॥ रात्रिः॥ अत्रिः॥ पत्रिर्वराः॥ पतेरत्रिः॥ पतत्रिः पक्षी॥ मङ ईचिः॥ मरीचि
दीप्तिः॥ वेञो डित्॥ वीचिस्तरङ्गः॥ नञ्समासे अवीचिर्नरकभेदः॥ पुरः कुषः॥ पुरुषः॥ पुर अग्रगमने॥ ष्टनहिकलिभ्य उषः
॥ पुरुषम्॥ नहुषः॥ कलुषम्॥ पीयेरूषः॥ पीयइति सौत्रः॥ पीयूषम्॥ मस्जेर्नुम्च॥ मञ्जूषा॥ गडेश्च॥ गडि संचये॥ गण्डूषः॥
शकादेरटः॥ शाकटोऽस्त्रियाम्॥ काकि गतौ॥ कङ्कटः सन्नाहः॥ डुकृञ् करणे॥ करटः॥ कलिकर्दोरमः॥ कलमः॥ कर्द कुत्सित
शब्दे॥ कर्दमः॥ पुल्यादेः किन्दः॥ पुल संस्त्याने॥ पुलिन्दः॥ कुप क्रोधे॥ कुपेर्वा वः॥ कुविन्दः कुपिन्दो तन्तुवायो॥ नौ षञ्जेर्घथिः
॥ निषङ्गथिः॥ सञ्जतीति॥ सारथिः॥ खर्ज्जादेरूरः॥ खर्ज्जूरः॥ कुसुमसामर्थ्ये॥ कर्पूरम्॥ वल्लावल्लूरं शुष्कमांसम्॥ लङ्गेर्वृद्धिः॥
लाङ्गूलम्॥ कुसूलम्॥ कुवश्चट् दीर्घश्च॥ कूचौ चित्रलेखनिका॥ सिवेष्टेरूच॥ सूची॥ शमेर्वः॥ शम्बो मुशलम्॥ उल्बा
दयः॥ उल्बो गर्भः॥ शुल्बं ताम्रम्॥ स्था॥ स्तवकः पुष्पगुच्छः॥ शशापिभ्यां दः॥ शादो जम्बालघासयोः॥ शब्दः॥ अब्दादयः
॥ अवतीति अब्दः॥ कुन्दः॥ वलिमलितनिभ्यः कयः॥ वलयम्॥ मलयः॥ तनयः॥ हृञो दुक्॥ हरतीति हृदयम्॥ मिनोतेः॥

॥[illegible] जन्वादयः॥ जनीः॥ जत्रु॥ स्तृशाखे॥ क्रूरमृगभेदः॥ प्रातपतीनिशत्रुः॥ कुसेरुंभोमेदेताः॥ कुसुम्भम्॥ कुसुमम्॥
॥कुसीदम्॥ कुसितः॥ तराङुलादयः॥ तराडुला॥ अङ्कुशः॥ चपा वषोलोप पकंटकः॥ पलगतौ॥ पल्वलमल्पसरः॥ त्रिधषा॥ विस्प
म्॥ शाल्मम्॥ मृङ्घाकम्पाविभ्यः त्कः॥ मृलम्॥ शल्कः॥ अम्लोरसः॥ अह्लोरसः॥ मादेर्घ्यः॥ माघा॥ छाया॥ शुसु॥ शस्पम्॥ बुष्प॥ सप्त
म्॥ जनेर्यक्॥ जन्यमाजा ॥ अघ्न्यादयः॥ हन्॥ अघ्ना माहेयी॥ अघ्नः प्रजापतिः॥ कनीदीप्तौ॥ कन्या॥ वन्ध्य॥ वन्ध्या॥ अन्यपरि
र्वन्॥ अर्वा॥ ए पर्वा॥ प्याप्योः सम्प्रसारणम्॥ प्येङ् स्फेङ्नुद्वे॥ पीवा धीवा॥ अहेर्धः॥ अध्वा॥ धातोरिः॥ पाजिः॥ वटः॥ वटिः॥
जनिः॥ बोधिः॥ हरिः॥ वर्तिः॥ नाम्युपधात्किः॥ कृषिः॥ काषिः॥ शुचिः॥ लिपिः॥ तूलनिष्कर्षे॥ तूलिः॥ क्रमितमिशाति
स्तम्भामतश्च॥ क्रिमिः॥ तिमिः॥ शितिः॥ स्तिभिः॥ मनेरुतश्च॥ मुनिः॥ वर्णोर्वल्लिः॥ वर्सिस्सोनश्च॥ वलिः॥ वपादेरिञ्॥ वापिः॥
॥राजिः॥ वारि॥ नहोभश्च॥ नाभिः॥ जनिः॥ आजिः॥ आतिः॥ अशेरुट्॥ राशिः॥ बातेर्डित्॥ विः॥ पक्षी॥ नीम्भादयः॥ निपूर्वाद्वे
श्च॥ नीविः॥ प्रहिः॥ समानख्यापतेजनेरितिसरवा॥ आङ्पूर्वाश्रिद्द्नौ॥ आश्रिः॥ अहिः॥ कादेश्च किः॥ कः॥ किरिर्वराहः॥ गरागि

रिर्गो त्रा॥सिरो गयोः॥शिर॥पुरिर्नगरं॥पन्ना नदी च॥मन्थ धातोः॥मन्थाकर्म॥ चर्म॥भस भर्त्सनदीप्त्योः॥भस्म॥जन्म॥छद्म॥सु
सुत्रायते॥सुत्रामा इन्द्रः॥बृहेर्नस्य अः॥ब्रह्म तत्त्वं तपो वेदः॥ब्रह्माधिपः प्रजापतिः॥नामादयः॥म्ना॥नाम॥विद्म॥सि
नोतेर्दीर्घः॥सीमा॥व्येञः स्यो त्वं पुरः॥व्योम॥रौतेः॥रोम॥पाप्मा॥वेञ्॥वेमा॥अतेर्मनिण्॥आत्मा॥हनिमाशिभ्यां सि
कः॥हंसि काहंस पोषिति॥मषा शब्दे॥मासिका॥कोरः॥कवरः॥कवरी केशविन्यासे॥गिरुडः॥गरुडः॥इन्देः कमिन्नलोप
श्च॥इदम्॥कायतेर्डिमः॥किम्॥धातोः ष्ट्रन्॥वस्त्रम्॥अस्त्रम्॥हत्रम्॥छत्रम्॥सिविमुच्योष्टेरूः॥सिव्॥सूत्रम्॥मुह्य॥मूत्र
म्॥अमादेः क्रः॥आ[illegible]त्रम्॥चित्रम्॥मित्रम्॥वप्रा उष्ट्रः॥पूञो ह्रस्वः॥पुत्रः॥स्त्यापतेर्ड्ट्॥स्त्यापतः शुक्रशोणितेप
स्पृष्टा॥स्त्री॥गमेरा॥गात्रम्॥चरीदेरित्रः॥चारित्रम्॥वादित्रम्॥आर्शी त्रादिभ्यश्चो चैः॥आशौत्रम्॥वादित्रम्॥धरित्री॥
अम्॥अमित्रः शत्रुः॥नैष्ट्र॥त्रोत्रम्प्रहरणम्॥चितेः कणः कश्च॥चिक्कणम्॥स्त्वेस्सः॥स्त्स्सम्॥पातेर्डुमसुः॥पुमान्॥
[illegible] भुजादेः किष्यः॥भुजिष्यो दासः॥वसादेस्तिः॥वास्तिः॥शास्तिः॥विन्ध्याख्यमगमस्यतीति॥अगस्तिः॥वेत

वं·सिं·कृ०

सेः॥तमुडपक्षेपे॥वितस्ति र्द्वादशाङ्गुलः॥पतिः॥हसातेर्ह्रस्वः॥रतिः कारस्कृ पिष्पः कीटः॥किरीटम्॥तिरीटम्॥कृपीट
म्॥धातोरसुः॥चेतः॥सरः॥पयः॥अशोर्युट्ह्रस्वश्च॥स्तृपतेशती यशः॥ऽञ्जेर्वलोपः॥ओजः॥श्रिञः पीरः किच्च॥पीरः॥अ
र्त्तेरुः॥उरः॥व्याधौ शुट्॥अर्शः॥उदकेनुट्॥अर्णः॥इणआगसि॥एनः पापम्॥स्रुरीभ्यां तुट्च॥स्रोतः॥रेतः॥पातेरुदकेथु
ट्॥पाथोजलम्॥अदेर्भक्ते घो नुम्च॥अन्धः॥अपउदके ह्रस्वो नुम्भौ च॥ अम्भः॥नहेर्दिविभः॥नभः॥इणआग अपराधे॥आ
गः पापापराधयोः॥अमेर्हुक्॥अंहः पापम्॥रमे श्च॥रंहः॥रमु॥देशे हच॥रमन्ते ऽस्मिन्नीति रहः॥रञ्जपादेर्धकित॥रजः॥भुवः
॥भुवसी॥वसेर्णित्॥वासः॥चन्देरादेश्च छः॥छन्दः॥वचादेस्सुट्॥व स्तःभुवः॥[illegible]॥डुपचष्पाके॥पक्षः
॥नाञि हनेरेह च॥अनेहा॥अनेहसौ॥विधाञो वेधचं॥वेधाः॥चन्देर्माऽनेङित्॥चन्द्रमाः॥पुरसिधाञः॥पुरोधाः॥उषः कित्॥उषः
॥दमेरुनसिः॥दमुनाः॥वशेः कनसि॥उशना भार्गवः कविरित्यमरः॥ अङ्गिरस्य॥अगि॥अङ्गिराः॥अप्पूर्वसर्त्तिः॥अप्स
राः॥पुरुपूर्वे रौतिः॥पुरूरवाः॥अदिभुवोडुतः॥अद्भुतम्॥गृधेरूमः॥ गोधूमः॥मसेरूरः॥मसूरः॥तहेः क्रो हल्लोपः॥तक्रम्॥

राम०

॥दंसेष्टोन आ च॥दासीमाने॥दासः॥दंशेश्च॥दाशः॥सोरमेः कः सोर्दीर्घः॥सुतानं रमते स्मरतः॥एञ्जोपो रगुक् ह्रस्वश्च॥पुरापम्
॥स्त्रं प्यते शिर्षस्य किंत्वं कुडू॥प्रीकाम॥अर्त्तेः रूकुरुरच॥उरूराः॥उदिदृशाग्नेः ऊदो दलोपश्च॥उदरम्॥खनेरूमुट् उप
त्ययः॥मुखम्॥अमेस्सन्॥अंसः॥मुहेः खो मूर्च॥मूर्खः॥नहेर्हलोपश्च॥नखः॥शीङो ह्रस्वश्च॥शिखा॥माङऊखोमय
व॥मयूखः॥गल अदने॥गलेः फक् गस्योच्च॥गुल्फः॥पादग्रन्थिः॥स्ट शोशश्रुवशो [illegible]॥[illegible]॥पार्श्वः॥श्मनिश्रित्रोडुः
॥श्मन्शब्दो मुखवाची॥श्मानं मुखं श्रयते श्मश्रु॥जनेरुः जंवच॥जङ्घा॥हन्तेः शरीरावयवे द्वे च॥जघनम्॥क्लिशेर्लस्य
लोपश्च॥केशः॥फलेरितः फस्य पः॥पलितम्॥कृञ आदेर्वुः॥करकः॥करकः॥नञ्नपे॥नरकः॥कुरशब्दे॥कोरकः॥ची
कपते राघन्तविपर्ययः॥चीकृशब्दे॥कीचकः॥पचिमच्योरित्वं॥पेचकः॥मचकल्कने॥मेचकः॥जनेरष्टच॥जठ
रम्॥हर्यतेः कन्योहिरच॥हर्य्यगतिकान्त्योः॥हिरण्यम्॥कृञः पाशः॥कर्पाशः॥कर्पाशः॥ऊर्णोर्डः॥ऊर्णा॥दृषा
तेर्ण्योनुट् च॥धान्यम्॥तनोतेर्डउः सवच्च॥तितउः॥अर्भकादपः॥अर्भकः॥पृथा॥पृथुकः॥पचतेः पाकः॥वदेर्नित्॥

चं·सिं·कृ·

॥अवघमः॥ दूष्यम्॥ अवमः॥ अधमः॥ त्किश॥ कीनाशः॥ चतेरूर॥ चत्वारः॥ हन्तेर्हुरच॥ घोरम्॥ स्मेरलोपश्च॥ स्मा॥ रथी
॥जरतेर्डीः॥ मेयः॥ जीर्णः॥ ग्रहेरनिः॥ ग्रहणिः॥ व्याधिभेदः॥ प्रथेरमः॥ प्रथमः॥ चरेश्च॥ चरमोऽन्तः॥ मङ्गेरलः॥ मङ्गिस
र्पिणो॥ मङ्गलम्॥ ॥सहोऽणादयः॥ सर्वस्मिन्काले उणादयः॥ उणादयोऽपरिमिताः॥ प्रयोगमनुसृत्य प्रयोक्तव्याः॥ तुमर्थाद
र्थीयायाम्भविष्यति॥ धातोर्भविष्यति काले तुम्प्रत्ययः स्तदर्थीयां क्रियायामुपयुज्यमानायाम्॥ भोक्तुम्व्रजति॥ पठितुमीष्टे॥
॥तुमः पर्य्येवुरा॥ कृष्णन्दर्शको याति॥ कालसमयवेलासु॥ अर्थे तुङ्काल॥ स्तोतुं समयः॥ भोक्तुम्वेला॥ इच्छार्थे ष्वेककर्तृके
सूपपदेषु धातोस्तुम्॥ इच्छति भोक्तुम्॥ वाञ्छति वाञ्छति वा॥ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु॥ शक्नोति भोक्तुम्॥
धृष्णोति जानाति वक्तुम्॥ ग्लायति भोक्तुम्॥ घटते मन्तुम्॥ रभते पक्तुम्॥ लभते भोक्तुम्॥ क्राम्पतीत्यादि॥ अस्ति भवति विद्य
ते वा॥ पर्याप्तिवाचिषु सामर्थ्यार्थेषु॥ पर्याप्तो भोक्तुम्॥ प्रवीणः॥ समर्थः॥ कुशलः॥ पर्याप्नोतीति किम्॥ अलं भुक्त्वा॥ सामर्थ्या
र्थेषु किम्॥ पर्याप्तं भुंक्ते॥ घञ्भावे॥ पाकः॥ त्यागः॥ भावः॥ दायः॥ संज्ञायामकर्तरि च॥ कर्तृवर्जिते कारके भावे च घञ्स

राम०

ज्ञायामसंज्ञायाञ्च॥ प्रतिकार्यमाह्रियते प्रत्याहारः॥ दीयते ऽस्मै दायः॥ संज्ञायाम्॥ विक्रीयते ऽनेन विकारः॥ ऽपेत्या
स्माद् धीयते इत्युपाध्यायः॥ व्रजः॥ येकः॥ व्रजो ऽपवादः॥ विघ्नः॥ सुघ्नः॥ स्वहादः॥ भावादेर्बाधो ऽपवादः॥ चयः॥ न
यः॥ षित्॥ विषयः॥ स्तवः॥ करः॥ लवः॥ वयः॥ प्राद्युपसर्गहीनस्य छादेर्ह्रस्वो ऽप्रत्यये॥ परिच्छाद्यते ऽनेनेति परिच्छदः
छादीतिकिम्॥ अन्ववच्छादः॥ समवपरिच्छादः॥ महाम्॥ मदादीनाम प्रत्ययो भावादौ॥ मदः॥ पराः॥ प्रमदः॥ संमदः
॥ शमः॥ आश्रमः॥ मूर्त्तौ घनः॥ काठिन्ये परिच्छेदे वहन्तेरप्रत्ययो घनादेशश्च॥ दधिघनः॥ मेघवचनः॥ हनो वधो ऽप्रत्यय
श्च॥ वधः॥ ड्वितो ऽथुच्॥ ड्वितो धातोरथुच् प्रत्ययो भवति भावादौ॥ वेपथुः॥ वमथुः॥ नन्दथुः॥ स्वपथुः॥ ड्वितात्त्रिमकृत
कृते॥ ड्वितो धातोस्त्रिमक् प्रत्ययो निर्वृत्ते ऽर्थे॥ करणेन निर्वृत्तः॥ कृत्रिमः॥ प्रच्छादिवच्छोः शनेः सम्प्रसारणञ्च॥ प्रश्नः॥ वि
॥ रक्षपालने॥ रक्षाः॥ स्वप्नः॥ अन्तर्द्धिरयवाररणाम्॥ आधिः॥ आदिः॥ प्रधिः॥ व्याधिः॥ वारिरोधिधीयते ऽस्मिन्निति वारिधिः
॥ जलधिः॥ आधिः॥ उदधिः॥ पुट्भावे॥ ज्ञानम्॥ करणम्॥ साधनाधारयोश्च॥ पच्यते ऽनेनेति पचनो ऽग्निः॥ पच्यते

चं॰सिं॰का॰

स्यां पचनी स्थाली॥ ईषदुःसुषु खल्॥ ईषदादिषु षपु ज्यमानेषु खल् स्यात् तौ स्तो भावा द्वौ॥ ईषत्करः॥ दुर्भवः॥ सुकरः॥ दुः
खेन युध्यते ऽस्मात्॥ दुर्योधनः॥ सुखेन युध्यते ऽस्मात्॥ सुयोधनः॥ दुःशासनः॥ कर्तृकर्मणो च्व्यर्थयोरीषदादिषु चो
पपदे खल्॥ अढ्याढ्येन दुराढ्येन भूयते दुराढ्यम्मन्योभवता॥ अस्वाम्यः स्वाम्यः क्रियते स्वाढ्यङ्करः॥ तव्यानीयौ॥
भावकार्य्ययोः॥ भवितव्यम्॥ भवनीयम्॥ एधितव्यम्॥ एधनीयम्॥ आसितव्यम्॥ चेतव्य च्चयनीयो धर्मस्त्वया॥ वसेस्तव्यत्
कर्तरि णिच्च॥ वसतीति वास्तव्यः॥ केलिमः॥ माषाः पचेलिमाः॥ भिदेलिमाः सरलाः॥ स्वरात् यः॥ स्वरान्ताद्धातोर्यः॥ चेय
म्॥ जेयम्॥ जेयम्॥ दित्स्यम्॥ ईच्चातः॥ आकारान्ताद्धातोर्यः॥ आकारस्य ईकारः॥ देयम्॥ जेयम्॥ ग्लेयम्॥ म्लेयम्॥ पुश
कात्॥ पवर्गान्तात् शकारादेश्च यः प्रत्ययः॥ शप्यम्॥ पम्यम्॥ जप्यम्॥ शक्यम्॥ सह्यम्॥ ऋहसान्तात् घ्यण्॥ ऋवर्णान्ता
द्धसान्ताच्च धातोर्घ्यण् भावकार्ययोः॥ कार्य्यम्॥ हार्य्यम्॥ वात्यम्॥ द्वात्यम्॥ पाक्यम्॥ रोग्यम्॥ वाक्यम्॥ घ्यणि क्वचित्कु
त्वाभावः॥ पाज्यम्॥ याच्यम्॥ वाच्यम्॥ ओराऽऽवश्यके॥ उवर्णान्ताद्धातोरावश्यके घ्यण् भावकर्मणोः॥ ओरोतो र्पश्च खत्॥ ओ

११म॰

कारौकारयोर्निमित्तंयस्स्वरवत्॥लुम्पेदवश्यमःकृत्येतुङ्काममनसोरपि॥समोवाहितततयोर्मांसस्यपचि
युड्घञोः॥अवश्यंलाव्यः॥अवश्यलाव्यः॥भोक्तुंकामः॥भोक्तुकामः॥श्रोतुंमनाः॥श्रोतुमनाः॥संहितम्॥सहित
म्॥सन्ततम्॥सततम्॥मांस्पचनम्॥मांसपचनम्॥मांस्पाकः॥मांसपाकः॥हनोवधादेशोये॥वध्यम्॥ऋदुपधात्
कृपः॥ऋकारोपधाद्धातोःक्यप्॥वृतु॥वृत्यम्॥वृत्यम्॥वृध्यम्॥कृपिचृत्योर्न॥कल्प्यम्॥चृतदीप्तौ॥चर्त्यम्॥मृजे
र्वा॥मृज्यम्॥मार्ज्यम्॥मार्ग्यम्॥भुवोभावे॥नाम्निउपपदेभुवोभावेक्यप्॥ब्रह्मणोभावोब्रह्मभूयम्॥नाम्नीतिकि
म्॥भव्यम्॥इणस्तुवृदृभ्यःशासजुषखनःक्यप्॥इत्यः॥स्तुत्यः॥वृत्यः॥दृङ्॥दृत्यः॥मृत्यः॥शासेरिः॥शिष्यः॥जुषी॥
जुष्यः॥खनइत्वंक्यपि॥खेयम्॥भिद्योद्ध्यौनदे॥एतौनिपात्येते॥भिनत्तिकूलंभिद्यः॥उज्झत्युदकम्॥उज्झतिजलमिति॥उ
द्ध्यः॥कृवृषोर्वाक्यप्॥कृत्यम्॥कार्य्यम्॥वृष्यम्॥वर्ष्यम्॥पुष्यसिध्यौनक्षत्रे॥पुष्यन्तिकार्य्याण्यस्मिन्निति पुष्यः
॥सिध्यः॥राजसूयादयः॥राज्ञासोतव्योराजसूयः॥सूर्यः॥तव्यादयोर्हेविधौशक्तौचवाच्याः॥दर्शनार्होद्रष्टुंशक्यो।

चं०सि०कृ०

वाद्रष्टव्यः ॥ दर्शनीयः ॥ द्रष्टव्यः ॥ स्वाध्यायोऽध्येतव्यः ॥ अध्ययनीयः ॥ अध्येयः ॥ श्रोतव्यः ॥ मन्तव्यः ॥ निदिध्यासितव्यः ॥ भारो
वोढव्यः ॥ वहनीयः ॥ व्रज्यादीनां कृत्यसञ्ज्ञा ॥ स्त्रियां यजां भावे ॥ इज्या ॥ व्रज्या ॥ समज्या ॥ निषद्या ॥ निपत्या ॥ मन्या ॥ विद्या ॥
सुत्या ॥ शय्या ॥ भृत्या ॥ इत्या ॥ कृञो यश्च ॥ अयकि ॥ क्रिया ॥ इच्छेरिच्छेति निपातः ॥ इच्छा ॥ सर्तेर्गुणः ॥ परिसर्प्या ॥ अटाट्या
॥ अशस्या ॥ जागर्तेर्गुणः ॥ जागर्य्या ॥ हनस्तः ॥ हत्या ॥ क्तिः स्त्रियां भावे ॥ कृतिः ॥ वृद्धिः ॥ स्मृतिः ॥ अमान्तस्य दीर्घः ॥ शा-
न्तिः ॥ दान्तिः ॥ कान्तिः ॥ क्षान्तिः ॥ ह्वक्त्योर्नेट् ॥ संश्रीतिः ॥ ग्रहादीनामिट् ॥ निगृहीतिः ॥ ग्लादेर्निः ॥ ग्लानिः ॥ म्लानिः ॥ ज्या-
निः ॥ हानिः ॥ त्वरतेर्वस्योत्वरतेम् ॥ तूर्णिः ॥ ऋल्वादिभ्यः क्तेर्निः ॥ कीर्णिः ॥ लूनिः ॥ धूनिः ॥ सम्पदादेः क्विप् वा ॥ सम्प-
त् ॥ सम्पत्तिः ॥ कर्त्तरि क्तिः सञ्ज्ञायाम् ॥ प्रकृते इति प्रकृतिः ॥ षिद्भिदाद्यङ् ॥ षितो धातोर्भिदादेश्च स्त्रियामङ् ॥ पचा ॥ म-
जा ॥ ऋतोऽङि गुणः ॥ जरा ॥ भिदा ॥ छिदा ॥ क्षिपा ॥ गुहा ॥ गुरोर्हसात् ॥ गुरुमतो धातोर्हसान्तात् स्त्रियामङ् नोक्तिः ॥ ईहा
॥ ऊहा ॥ कुडि दाहे ॥ कुण्डा ॥ प्रत्ययान्तात् स्त्रियामङ् ॥ चिकीर्षा ॥ लोलूया ॥ कण्डूया ॥ पुत्रकाम्या ॥ इक्श्तिपौ धातुनिर्दे-

राम०

ष्ठे॥पचिः॥पचतिः॥त्त्यन्तार्थोसश्रन्थग्रन्थघट्टवन्दिविदिरुचिभ्यः स्त्रियांयुः॥कारणा॥अर्थणा॥आसना॥श्रन्थना॥
ग्रन्थना॥घटना॥वन्दना॥वेदना॥रोचना॥इच्छाजादिभ्यश्च॥आप्तिः॥आतिः॥आक्रोशेनञ्यनिः॥अजननिः॥अकरणिः॥
रकृकृष्यादिभ्यः॥कृषिः॥गिरिः॥किरिः॥पूर्वकालेक्त्वा॥धातोस्समानकर्तृकेप्रयुज्यमानेक्त्वाप्रत्ययः॥क्त्वासेट्कि
न्न॥वर्त्तित्वा॥शापित्वा॥मृडमृदगुधकुषक्लिशवदवसरुदविदमुषग्रहिभ्यःकित॥मृडमुखे॥मृडित्वा॥मृदित्वा॥
गुधित्वा॥कुषित्वा॥क्लिशित्वा॥उदित्वा॥उषित्वा॥रुदित्वा॥विदित्वा॥मुषित्वा॥गृहीत्वा॥नोपधात्थफान्ताद्वाकि
त॥ग्रन्थ॥ग्रन्थित्वा॥ग्रथित्वा॥गुम्फित्वा॥गुफित्वा॥नोपधात्किम्॥कोथित्वा॥रेफित्वा॥थफान्तात्किम्॥स्त्रंसित्वा
अलंखल्वोःप्रतिषेधे॥अलम्भुक्त्वा॥खलुकृत्वा॥उदितः॥क्त्वोवेट्॥शमित्वा॥शान्त्वा॥भ्रमित्वा॥अदोजग्धः॥जग्ध्वा
॥समासेक्यप्॥समासेसतिपूर्वकालेक्यप्समानकर्तृकेधातोप्रयुज्यमाने॥संभूत्यकरोति॥प्रणम्यगच्छति॥नन
ञ्पूर्वइत्येके॥अकृत्वा॥क्यपिलघुपूर्वात्परस्यणेरय्॥परिनमय्य॥परिगणय्य॥परिणमयित्वा॥परिगणयि

त्वा ॥ विगणापित्वा ॥ विनमापित्वा ॥ विगणय्य ॥ विनमय्य ॥ लघुपूर्वात्किम् ॥ सम्प्रधार्य्य ॥ आप्नोतेर्वा ॥ प्रापय्य ॥ प्राप्य ॥
कृपीत्वा भावः ॥ प्रदाय ॥ प्रस्थाय ॥ प्रसाय ॥ विधाय ॥ मीनातिमिनोतीत्यात्वम् ॥ प्रमाय ॥ निमाय ॥ उपदाय ॥ एवं लीङ्
लीङोऽशात्वम्वेत्याह ॥ विलाय ॥ विलीय ॥ तत्काले ऽपि क्त्वा चेत् ॥ नेत्रे संमील्य हसति ॥ मुखं व्यादाय स्वपिति ॥ पौनःपुन्ये
णाम्युल् द्विरुक्तिश्च ॥ समानकर्तृकेषु धातुषु पूर्वकाले णमुल् णमन्तस्य द्विर्वचनम् ॥ पायंपायं गच्छति ॥ भोजंभोजम् ॥
स्मारंस्मारम् ॥ मितां ह्रस्वान्तानामिणिति णवा दीर्घः ॥ भामंभामम् ॥ गमंगमम् ॥ क्त्वा च ॥ पीत्वापीत्वा ॥ भुक्त्वाभुक्त्वा ॥ लभेरि
णमोर्नुम्वा ॥ लम्भंलम्भम् ॥ लाभंलाभम् ॥ कथमादिषु स्वार्थे कृञो णम् ॥ कथंकारम् ॥ अन्यथाकारम् ॥ एवंकार
म् ॥ इत्थंकारम् ॥ पठति ॥ इत्थम्पठतीत्यर्थः ॥ अग्रेप्रथमपूर्वेषूपपदेषु त्वा णमो वा ॥ अग्रेभोजम् ॥ व्रजति ॥ अग्रेभुक्त्वा
॥ प्रथमंभोजम् ॥ प्रथमंभुक्त्वा ॥ पूर्वम्भोजम् ॥ पूर्वम्भुक्त्वा ॥ प्रसेऽसत्यप्याभावः ॥ अग्रेभुक्ते न ततो व्रजति ॥ आभीक्ष्ण्ये
तु पूर्वेणामित्यमेव णम् ॥ अग्रेभोजंभोजं व्रजति ॥ कर्म्मण्याक्रोशे कृञः खमुञ् ॥ चौरंकारमाक्रोशति ॥ चौरशब्द

मुच्चार्येत्यर्थः॥ च्व्यर्थेषु स्वादुमर्थेषु कृञो णमुल्स्यादेककर्तृकयोः पूर्वकाले। पूर्वपदस्य मान्तत्वं निपात्यते॥ अस्वादुं
स्वाद्वीं कृत्वा भुङ्क्ते स्वा[illegible]दुंकारं भुङ्क्ते॥ संपन्नंकारम्॥ लवणंकारम्॥ लवणंकारम्॥ संपन्नलवणशब्दौ
स्वादुपर्यायौ॥ क्त्वापि॥ स्वादुं कृत्वा भुङ्क्ते॥ यथातथयोरसूयाप्रतिवचने कृञः सिद्धाप्रयोगे णमुल्॥ यथाकारम
हं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन॥ कर्मणि दृशिविदोः साकल्ये॥ कन्यादर्शं वरयति। सर्वाः कन्या इत्यर्थः॥
ब्राह्मणवेदं भोजयति॥ यं यं ब्राह्मणं जानाति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः॥ यावति विन्दजी
वयोः॥ यावद्वेदं भुङ्क्ते॥ यावल्लभते तावदित्यर्थः॥ यावज्जीवमधीते॥ यावज्जीवति तावदधीत इत्यर्थः॥ कर्म
णोश्चर्मोदरयोः पूरेः॥ चर्मपूरं स्तृणाति॥ उदरपूरं भुङ्क्ते॥ कर्मण्युपपदे पूरे रूलोपश्च वा वर्षप्रमाणे गम्ये॥
गोष्पदप्रं वृष्टो देवः॥ गोष्पदपूरम्वा॥ चेलार्थेषु कर्मसूपपदेषु क्नोपेर्वर्षप्रमाणे णमुल्॥ चेलक्नोपं वृष्टो देवः॥
वः॥ वस्त्रक्नोपम्॥ वसनक्नोपम्॥ निमूलसमूलयोः कषः॥ कषादिषु यथाविध्यनुप्रयोगः प्रयोक्तव्यः॥ अ

वं॰सिं॰कौ॰

त्रयुक्तस्तो पूर्वकाल इति निसंबध्यते॥ निर्मूलकार्षं कषति॥ समूलकार्षं कषति॥ निर्मूलं समूलं कषतीत्यर्थः॥ शुष्कचू
र्णरूक्षेषु पिषः॥ शुष्कपेषं पिनष्टि॥ शुष्कं पिनष्टीत्यर्थः॥ चूर्णपेषं पिनष्टि॥ रूक्षपेषं पिनष्टि॥ समूलाकृतज
जीवे[illegible]ष्वसु हनकृञ्ग्रहां णमु॥ समूलघातं हन्ति॥ समूलं हन्तीत्यर्थः॥ अकृतकारं करोति॥ अकृतं करोतीत्य
र्थः॥ जीवग्राहं गृह्णाति॥ जीवं गृह्णातीत्यर्थः॥ करणे हनः॥ पादघातं हन्ति॥ पादेन हन्तीत्यर्थः॥ स्नेहने पिषः
॥ उदकपेषं पिनष्टि॥ उदकेन पिनष्टीत्यर्थः॥ हस्तार्थे करणे वर्त्तिग्रहोः॥ हस्तवर्त्तं वर्त्तयति॥ करवर्त्तम्॥ ह
स्तेन गुटिकां करोति॥ हस्तग्राहं गृह्णाति॥ करग्राहम्॥ पाणिग्राहम्॥ धनार्थे करणे पुषः॥ धनपोषं पु
ष्णाति॥ स्वपोषं पुष्णाति॥ गोपोषम्॥ आधारे बन्धः॥ चक्रबन्धं बध्नाति॥ चक्रे बध्नातीत्यर्थः॥ संज्ञायां बध्नातेः
॥ क्रौञ्चबन्धं बद्धः॥ मयूरिकाबन्धं बद्धः॥ अट्टालिकाबन्धं बद्धः॥ बन्धविशेषाणां संज्ञा एताः॥ कर्त्रोर्जीवपु
रुषयोर्नशिवहोः॥ जीवनाशं नश्यति॥ जीवो नश्यतीत्यर्थः॥ पुरुषवाहं वहति॥ पुरुषो वहतीत्यर्थः॥ ऊर्ध्वे क

राम॰

ने॥ रि शुषिपूरोः॥ ऊर्ध्वशोषं शुष्यति॥ ऊर्ध्वः शुष्यतीत्यर्थः॥ ऊर्ध्वपूरं पूर्यते॥ ऊर्ध्वः पूर्यत इत्यर्थः॥ उपमाने
कर्मणि कर्त्तरि च॥ घृतनिधायं निहितं जलम्॥ घृतमिव सुरक्षितमित्यर्थः॥ अजनाशं नष्टः॥ अज इव न
ष्ट इत्यर्थः॥ कषादिषु यस्माण्णमुल् विहितः तस्यैवानुप्रयोक्तव्यः॥ तत्रैवोदाहृतम्॥ उपदंशस्तृतीयायाम्॥ इतः
स्मात् पूर्वकाल इति सम्बध्यते॥ मूलकोपदंशं भुङ्क्ते॥ मूलकेनोपदंशम्॥ दश्यमानस्य मूलकस्य भुजिं प्र
तिकरणत्वात् तृतीया॥ यद्यप्युपदंशिना सह न शब्दः सम्बन्धस्तथाप्यर्थोऽस्त्येव॥ हिंसार्थानां चानुप्र
योगधातुना समानकर्मकाणाम्॥ तृतीयान्ते उपपदे॥ दण्डोपघातं गाः कालयति॥ दण्डेनोपघातम्॥ दण्ड
ताडं ... दण्डेन ताडम्वा॥ समानकर्मकाणां किम्॥ दण्डेन चोरमाहत्य गाः कालयति॥ सप्तम्यां तृतीयायां
चोपपदे ... उपपीडरुधकर्षः॥ पार्श्वोपपीडम्॥ पार्श्वयोरुपपीडम्॥ पार्श्वाभ्यामुपपीडं शेते॥ व्रजोपरोधं गाः
स्थापयति॥ व्रजेनऽपरोधम्॥ व्रजेऽपरोधम्वा॥ पाण्युपकर्षं धानाः संगृह्णाति॥ पाणावुपकर्षम्॥ पा

चं॰सिं॰कौ॰

शिलो॰ ...ठीम्॥ तृतीयासप्तम्योरुपपदयोः सन्निकर्षे धातोः॥ केशग्राहं युध्यन्ते॥ केशेषु गृहीत्वा युध्यन
न्त्यर्थः॥ हस्तग्राहम्॥ हस्तेन गृहीत्वा॥ तृतीयासप्तम्योर्गम्ये धातोः॥ स्वङ्गुलोत्कर्षं खण्डिकां छिनत्ति॥
अंगुलेन अङ्गुले वोत्कर्षम्॥ अपादाने द्वितीयायां त्वरमाणे गम्यमानायां धातोः॥ शय्योत्थायं धावति
॥ यष्टिग्राहं युध्यन्ते॥ लोष्टग्राहं वा॥ अपगुरो णमुलि॥ अस्यपगारं युध्यन्ते॥ अस्यप
गोरम्॥ अध्रुवे स्वाङ्गे द्वितीयायां धातोः॥ भ्रूविक्षेपं कथयति॥ ध्रुवं विक्षेपम्॥ अध्रुवे किम्॥ शिर उत्क्षि
प्य॥ येन विना न जीवनं तद् ध्रुवम्॥ परिक्लिश्यमाने द्वितीयायां स्वाङ्गे धातोः॥ उरःप्रतिपेषं युध्यन्ते॥ कृत्स्न
मुरः पीडयन्तीत्यर्थः॥ उरोविदारं प्रतिचस्करे नखैः॥ ध्रुवार्थमिदम्॥ द्वितीयायां विशिपतिपदिस्कन्दां व्या
प्यमानासेव्यमानयोर्गम्ययोः॥ गेहादिद्रव्याणां विप्सायां क्रियाभिः साकल्येन संबन्धो व्याप्तिः क्रियायाः
पौनःपुन्यमासेवा॥ गेहानुप्रवेशमास्ते॥ गेहं गेहमनुप्रवेशमनुप्रवेशम्॥ एवं गेहानुप्रपातम्॥ गेहानुप्र

राम॰

[illegible]स्कन्दम्॥ असमासे तु गेहस्यानमनस्य च पर्य्यायेन द्वित्वम्॥ गेहंगेहमनुप्रवेशम्॥ गेहमनुप्रवेशमनु
प्रवेशमनु[illegible]शम्॥ कालेषु द्वितीयान्तेषूपपदेषु क्रियाव्यवधाने वर्त्तमानयोरस्यतितृषोः॥ द्व्यहात्यासं गाः पा
ययति॥ द्व्[illegible]त्यासम्॥ द्व्यहत्तर्षम्॥ द्व्यहन्तर्षम्॥ अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते॥ अथ पाययि
[illegible]द्व्यहमतिक्रम्य पाययतीत्यर्थः॥ नाम्न्यादिशिग्रहोः॥ नामादेशमाचष्टे॥ नामग्राहमाह्वयति॥
अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ॥ अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनम्
॥ उच्चैः कृत्य॥ उच्चैः कृत्वा॥ उच्चैःकारम्॥ अप्रियमाचष्टे॥ नीचैः कृत्य॥ नीचैः कृत्वा॥ नीचैःकारम्॥ प्रियमकृते॥ ति
र्यच्युपपदे समाप्तौ कृञः क्त्वाणमुलौ॥ तिर्य्यक्कृत्य गतः॥ तिर्य्यक्कृत्वा॥ तिर्य्यक्कारम्॥ समाप्य गत इत्यर्थः॥ स
माप्तेः किम्॥ तिर्य्यक्काष्ठङ्कृतः॥ स्वाङ्गे तस्प्रत्यये कृभ्वोः॥ मुखतः कृत्य गतः॥ मुखतः कृत्वा॥ मुखतःकार

वं॰सि॰-कृ॰

म॥मुखतोभ्यगतः॥मुखतोभूत्वा॥मुखतोभावम्॥नाधार्थप्रत्ययान्तेच्व्यर्थे कृभ्वोः क्त्वाणमौ॥अनानानानाकृ
त्वा इति॥नानाकृत्यगतः॥नानाधाकृत्वा॥नानाकारम्॥विनाकृत्वा॥विनाकृत्य॥विनाकृत्वा॥विनाकारम्॥नाना
भूत्वा॥नानाभूय॥नानाभूत्वा॥नानाभावम्॥अनेकद्रव्यमेकं भूत्वा॥एकधाभूय॥एकधाभूत्वा॥एकधाभा
वम्॥अनेकधा एकधाकृत्वा॥एकधाकृत्वा॥एकधाकृत्य॥एकधाकृत्वा॥एकधाकारम्॥प्रत्ययग्रहणं किम्॥
हिरुक्कृत्वा॥पृथग्भूत्वा॥तूष्णीं शब्दे भुवः क्त्वाणमौ॥तूष्णींभूयगतः॥तूष्णींभूत्वा॥तूष्णींभावम्॥अन्वक्शब्दे
भुवः क्त्वाणमौ॥आनुकूल्ये गम्ये॥अन्वग्भूयास्ते॥अनन्वग्भूत्वा॥अन्वग्भावम्॥अग्रतः पार्श्वतः पृष्ठतो वा अ
नुकूलो भूत्वा इत्यर्थः॥आनुकूल्ये किम्॥अन्वग्भूयास्ते॥अन्वग्भूत्वा तिष्ठति॥पृष्ठतो भूत्वा इत्यर्थः॥व
र्णात्कारः॥अकारः॥ककारः॥रादिफो वा॥रेफः॥रकारः॥लोकाच्छेषस्य सिद्धिर्यथा मतराः दे:॥ ॥

राम॰

[OrderDescription]
,CREATED=17.02.20 12:02
,TRANSFERRED=2020/02/17 at 12:19:22
,PAGES=155
,TYPE=STD
,NAME=S0002831
,Book Name=M-2685-DHATUCHANDIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF

FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF

FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF

FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,